॥ ॐ अर्हं नमः ॥

# श्रीहेमचन्द्रिका व्याकरणम् ॥

– रचयिता –

व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न

## पूज्यपाद-आचार्यदेव
## श्रीविजयलावण्यसूरीश्वरः ॥

मूल्य १ रु० ५० न.पै.

श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-५८

# ॥श्रीहेमचन्द्रिका-व्याकरणम्॥

रचयिता -

शासनसम्राट्-जगद्गुरु-तपोगच्छेश-बालब्रह्म-
चारि-विविधतीर्थोद्धारक-परमपूज्या-
चार्यदेवेश-श्रीविजयनेमिसूरी-
श्वरपट्टालंकार-व्याकरणवाचस्पति-
कविरत्न-शास्त्रविशारद-पूज्यपादाचार्य-
देवश्रीमद्विजयलावण्यसूरीश्वरः ॥

संपादकः संशोधकश्चः-

विद्वान् पू० मुनिराजश्रीमनोहरविजयः॥

प्रकाशिका-

श्रीज्ञानोपासक-समितिः,

बोटाद-सौराष्ट्र,

प्रमुखः

चिमनलाल हरिचन्द बगडीया.

विद्वद्वर्य पूज्यपाद पन्न्यासजी महाराज
श्रीसुशीलविजयजी गणिवरश्रीना
सदुपदेशथी आ पुस्तक छपाववामां
वराडा (राजस्थान)
निवासी
भण्डारी हेमराजजी, छोगालाल, कस्तुरचंद,
बाबूलाल, सरेमल, गेनमल, पारसमल,
बेटा पोता हंसराजजीना
तरफथी
रु० ५५१) नी उदार सहाय मळी छे
ते बद्दल संस्था
पू० सदुपदेशक अने माननीय सहायक
बन्नेनो आभार माने छे.

मुद्रक:
श्री मस्तूरमल कुम्भट
कुम्भट प्रिण्टर्स, घोड़ों का चौक, जोधपुर.
प्रथमावृत्ति : १००० प्रति.

# * किञ्चित् प्रास्ताविकम् *

अयि श्रीमन्तः ! सुरभारतीसमाराधनासादितसौजन्याः सुधियः, सुमतयश्छात्राश्च !

सर्वथा सुनिश्चितमेतत्-सर्वेषामेव बुद्धिजीविनां यच्छास्त्रज्ञानमन्तरा मानवजन्म निरर्थकमेवेति । शास्त्रेष्वपि व्याकरणज्ञानं विना न कोऽपि कुत्रापि कृतश्रमः साफल्यमवाप्नोतीति तज्ज्ञानं नितरामपेक्षितम् ।

संसारे प्राच्यपाश्च्यात्यौदीच्यादिसर्वसंप्रदाये प्रदेशे वा व्यवह्रियमाणानां सर्वासामेव भाषाणां जननीव प्राकृतसंस्कृतान्यतरभाषेतीतिहासकारा अपि प्रतिपादयन्ति; तत्र खलु संस्कृतभाषाया ज्ञानं सर्वेषामेवापेक्षितम्, तत्रापि भारतीयानां तु तत् स्वजीवनमिव पोषणीयं यतो भारतीया संस्कृतिः सभ्यता च सर्वथा निरुक्तभाषायामेव सन्नद्धा शुद्धा स्थिरीकृता च सुशोभते ।

अथ तद्वृद्धिकामनया तत्रभवान् भारतभानुः परम-

कारुणिकः स्याद्वाददर्शनमार्गप्रशस्तकरोऽप्रतिमप्रतिभा-संपन्नः स्वनामधन्यः **कलिकालसर्वज्ञो भगवान् श्री-हेमचन्द्राचार्यः** सुलभं सुन्दरं सर्वाङ्गपरिपूर्णं **गुर्जरेश्वर-श्रीसिद्धराजजयसिंहभूपते**रनुनयात् संस्कृतप्राकृतोभ-यभाषाव्युत्पादकं **श्रीसिद्धहेमचन्द्रशब्दानुशासनं** नाम व्याकरणरत्नं जग्रन्थ। यस्याध्ययनेन सपदि सरलतया चारुतरं शब्दज्ञानं संप्राप्य शिशुरपि शुद्धाशुद्धविवेकी कस्मिन्नपि शास्त्रे विना क्लेशं प्रवेशं प्राप्तुं प्रभवति।

अथ संस्कृतभाषा कठिना, रुग्णा, मृतेत्यादिरूपान् पाश्चात्यैरांग्लभाषाप्रेमपरैः प्रवर्त्तितान् मिथ्याप्रवादान् दूरीकर्तुङ्कटिबद्धेषु विद्वत्सु प्रधानतमेन तत्रभवता जैना-चार्य्येण शासनसम्राट्–जगद्गुरु-सूरिचक्रचक्रवर्त्ति-तपोग-च्छाधिपति–विद्वद्वृन्दावतंसाऽनेकतीर्थोद्धारकाचार्यदेवेश–**श्रीविजयनेमिसूरीश्वर**पट्टालंकारेण साहित्यिकशिरोम-णिना नवव्याकरणवनविहरणशीलकेशरिणा सर्वदर्शना-ध्ययनपरिशीलनसंजातशुद्धदृष्टिना **साक्षरशेखरेण श्री-**

**मता विजयलावण्यसूरीश्वरेण** श्रीसिद्धहेमव्याकरणस्य पोषकाणि निरवद्यानि अनेकलक्षपद्यप्रमितानि प्रभूतानि पुस्तकरत्नानि रचितानि। अनेन च व्याकरणजीवातुना श्रीमता सर्वदा शास्त्राध्यवसायवता सूरिणा श्रीसिद्धहेमशब्दानुशासनस्य शब्दमहार्णवन्यासानुसन्धानमपि निरमायि। ततश्च ससुगन्धस्वर्णमिव सौन्दर्यमासाद्य श्रीसिद्धहेमशब्दानुशासनं साधारणानामपि मनोमोदमादधाति।

इदानीमनेन महात्मना महामनीषिणाऽनेकविधव्याकरणसाहित्यन्यायागमादिग्रन्थसंपादनसंजातानुभवगुणवता मनीषिमण्डले परां प्रतिष्ठां प्राप्तवता व्याकरणवाचस्पतिना वृद्धवैयाकरणेन सकलजैनसम्प्रदाये अन्यात्रापि च सौकर्येण ज्ञानाय सूत्रवृत्त्यादिभेदमपनीय सर्वथा नूतनमेव श्रीसिद्धहेमशब्दानुशासनस्य स्वल्पं सुन्दरं स्वरूपं समुपस्थापितमस्ति।

अन्वर्थनामध्येयस्य श्रीगुरुसेवासंलग्नस्य मनीषिमुनिवरस्य **श्रीमनोहरविजयस्य** सविनयविज्ञप्त्या संपा-

दित: श्रीहेमचन्द्रिकानामाख्यं ग्रन्थ: समस्तानामेव व्याकरणविषयानां सारं संगृह्य अतिसरलया रीत्या संस्कृतभाषाया ज्ञानं प्रापयेदिति विचार्य, सर्वत्र राजकीयाराजकीयासु संस्थासु पठनपाठने प्रसारं प्राप्स्यतीति सहृदयानां सुधियां विश्वास: ।

शिवगंजे कृता सेयं बालार्थं हेमचन्द्रिका ।
शोभतां संगता सम्यक् संस्कृताध्ययनाम्बरे ॥१॥

—सर्वथा सर्वदा च सुकृतिनामाश्रव:—

पं. श्री सुरेश झा शास्त्री.

व्याकरणसाहित्याचार्यस्तर्कतीर्थ:, लब्धस्वर्णपदक: ।

राजकीयविद्यालये संस्कृतप्राध्यापक:,

शिवगंज, सिरोही, (राजस्थान).

卐

# * प्रकाशकीय निवेदन *

श्री विजयनेमिसूरीश्वरग्रन्थमालाना ५८ मां रत्न तरीके श्रीहेमचन्द्रिका व्याकरण प्रकाशित करतां अनेरो आनन्द अनुभवीये छीअे ।

भारतीय साहित्यनुं अवलोकन करवा माटे संस्कृत अने प्राकृत अे बे विमल नयन छे। प्रकाण्डप्रतिभासम्पन्न साक्षरगणे व्याकरणशास्त्रनी महत्ता आ प्रमाणे वर्णवी छे:- "प्रदीपः सर्वं विद्यानाम्" सकलशास्त्रमां प्रवेश करवा माटे व्याकरण ए प्रकाशक दीपक समान छे। 'व्याकरणात् पदसिद्धिः, पदसिद्धेरर्थनिर्णयो भवति । अर्थात् तत्त्वज्ञानं, तत्त्वज्ञानात् परं श्रेयः' ॥ १ ॥ व्याकरणथी पदनी सिद्धि थाय छे, पदनी सिद्धिथी अर्थनो निर्णय थाय छे; अर्थना निर्णयथी तत्त्वज्ञान थाय छे, अने तत्त्वज्ञानथी मोक्षथाय छे ।

सर्वतोमुखी प्रतिभावान् सर्वाङ्गीण साहित्य सृष्टिना सर्जक-कलिकालसर्वज्ञ परमपूज्य आचार्यदेवेश श्रीहेमचन्द्रसूरि भगवन्ते पंचांगी परिपूर्ण 'श्रीसिद्धहेमशब्दानुशासन' नामना व्याकरणनी प्रौढ सरल अने सुन्दर रचना करी छे। अने तेना उपर सर्व अभ्यासकोना उप-

कार माटे लघुवृत्ति, मध्यमवृत्ति अने बृहद्वृत्तिनी रचना पण पोतेज करी छे। तदुपरान्त साक्षरगणने आनन्द उपजावे एवा शब्दमहार्णवन्यासनी अजोड रचना पण एज महर्षिनी छे।

आपना करकमलमां आवतुं 'श्रीहेमचन्द्रिका व्याकरण' पण 'सिद्धहेमशब्दानुशासन' ना आधारेज रचायेलु छे। न्हाना अने सर्वांगसुन्दर आ व्याकरणनी रचना माटे रचयिता महर्षिने स्वशिष्यादि अने अन्य सुधीजनोअे विनंति करेली अने प्रान्ते गुरुभक्त पू० मुनिराजश्रीमनोहरविजयजी म० श्री नी विनंतिथी श्रीहेमचन्द्रिका व्याकरणनो शब्ददेह तैयार थयो छे। स्व० परमविद्वान् परमपूज्य उपाध्यायजीमहाराजश्रीमेघविजयजी गणिवर विरचित हेमशब्दचन्द्रिका व्याकरण शब्दसंक्षेप होवाथी विद्वद्भोग्यज गणाय अने सामान्य बुद्धिना विद्यार्थीओ माटे तो दुरधिगम्य गणाय। आ कारणथी हेमशब्दचन्द्रिकाना क्रमने लक्षमां राखी विशेष उपयोगी अनेक विषयो नो समावेश करी शब्दनी उदारता-

वालु आ व्याकरण रचायु छे। गागरमां सागर समान हेमचन्द्रिका व्याकरणनुं अध्ययन करी बालजीवो पण व्याकरण शास्त्रना भावोने जाणी अन्य शास्त्रोमां सरलताथी प्रवेश करी शकशे ए निर्विवाद सत्य छे।

हेमचन्द्रिकाना रचयिता सुप्रसिद्ध शासनसम्राट्-जगद्गुरु-तपोगच्छाधिपति-सूरिचक्रचक्रवर्त्ति-सर्वतन्त्रस्वतन्त्र–अनेकतीर्थोद्धारक–भूरिभूपालसन्मानितपूजितपादपद्म-बालब्रह्मचारी-परमाराध्यपाद परमपूज्य आचार्यदेवेश श्रीविजयनेमिसूरीश्वरजी म० श्रीना ख्यातनाम पट्टालंकार साधिकसातलाखश्लोकप्रमाणनूतनसंस्कृतसाहित्यना सर्जक अनुपमव्याख्यान सुधावर्षी साक्षरशिरोमणि बालब्रह्मचारी पूज्यपाद आचार्यदेव श्रीविजयलावण्यसूरीश्वरजी म० श्री छे। जेमनी साहित्यिक अनुपम शक्तिथी प्रसन्न थयेल गुरुभगवन्तश्रीए उपाध्यायपदना पुनित प्रसंगे व्याकरणवाचस्पति-कविरत्न-अने शास्त्रविशारद ए त्रण बिरूदोथी नवाज्या हतां। हेमचन्द्रिकाकारमहर्षिना पुण्यनामथी जैन समाज अने साक्षरगण भाग्येज अज्ञात हशे।

हेमचन्द्रिकानुं सुन्दर सम्पादन अने संशोधन रचनाकार महर्षिना शिष्यरत्न विद्याव्यासंगी, विद्वान् पूज्य मुनिराजश्रीमनोहरविजयजी म० श्री अे करेल छे।

प्रस्तुत पुस्तकना मुद्रणमां विद्वद्वर्य-प्रखरवक्ता-लेखपटु पूज्यपाद पन्न्यासजीमहाराज श्री सुशीलविजयजी गणिवरश्रीना सदुपदेशथी वराडा निवासी श्रेष्ठिवर्य श्री हेमराजजी हंसराजजी भण्डारी तरफथी रु० ५५१) नी उदार सहाय मली छे। आ पुस्तकनी प्रस्तावना शिवगंज राजकीय विद्यालयना प्राध्यापक पंडितप्रवर श्री सुरेश झाजी ए लखी छे। रचयिता, सम्पादक, सहाय सदुपदेशक-सहायक अने प्रस्तावक महाशयोनो सहकार अविस्मरणीय होवाथी ते तमामनो आभार मानीये छीअे।

शुभ लागणी पूर्वक अने झडपथी आ पुस्तक छापी आपनार जोधपुरना सुप्रसिद्ध **कुम्भट प्रेसना** मालिक **श्रीमखतुरमलजी कुम्भट** ने धन्यवाद छे।

प्रान्ते सरल, सुन्दर अने अति उपयोगी श्रीहेमचन्द्रिका व्याकरणनो अधिकतर उपयोग थशे एवा विश्वाससाथे विरमीए छीअे।

# ॥ अनुक्रमणिका ॥

## पूर्वार्द्धं


१. संज्ञाप्रकरणम्
२. स्वरसन्धिप्रकरणम्
३. असन्धिप्रकरणम्
४. व्यञ्जनसन्धिप्रकरणम्
५. रेफसन्धिप्रकरणम्
६. स्यादिसन्धिप्रकरणम्
७. स्वरांतपुंलिङ्गप्रकरणम्
८. ,, स्त्रीलिङ्ग ,,
९. ,, नपुंसकलिङ्ग ,,
१०. व्यंजनांत पुंलिङ्ग ,,
११. ,, स्त्रीलिङ्ग ,,
१२. ,, नपुंसकलिङ्ग ,,
१३. युष्मदस्मत्प्रक्रिया
१४. अव्ययप्रकरणम्
१५. स्त्रीप्रत्ययप्रकरणम्
१६. कारकप्रकरणम्
१७. समासप्रकरणम्-बहुव्रीहिः
१८. अव्ययीभावः
१९. तत्पुरुषः
२०. कर्मधारयः
२१. द्विगुः
२२. द्वन्द्वः
२३. एकशेषः
२४. समासान्तः
२५. अलुक्समासः
२६. समासाश्रयविधिः
२७. तद्धितप्रकरणम् ॥


## उत्तरार्द्धं


१. त्यादिविभक्तिप्रकरणम्
२. भ्वादिगणः, परस्मैपदम्
३. आत्मनेपदम्
४. उभयपदम्
५. द्युतादिः
६. ज्वलादिः
७. यजादिः, घटादिः
८. अदादिगणः, परस्मैपदम्
९. रुदादिपञ्चकः
१०. जक्षादिपञ्चकः

११. आत्मनेपदम्
१२. उभयपदम्
१३. ह्वादिः, परस्मैपदम्
१४. आत्मनेपदम्
१५. उभयपदम्
१६. दिवादिः
१७. पुषादिः परस्मैपद्येव
१८. शमादिसप्तकम्
१९. आत्मनेपदम्
२०. उभयपदम्
२१. स्वादिगणः
२२. तुदादिगणः
२३. रुधादिगणः
२४. तनादिगणः
२५. क्र्यादिगणः
२६. चुरादिगणः
२७. णिगन्तप्रक्रिया
२८. सन्नन्तप्रक्रिया
२९. यङन्तप्रक्रिया
३०. यङ्लुबन्तप्रक्रिया
३१. नामधातुप्रक्रिया
३२. आत्मनेपदपरस्मैपदप्रक्रिया
३३. भावकर्मप्रक्रिया
३४. त्याद्यर्थनिरूपणम्
३५. कृदन्तप्रकरणम्
३६. उणादयः
३७. भावे तुमो निरूपणम्
३८. भावाकर्त्रोः कृन्निरूपणम्
३९. कृत्यनिरूपणम्
४०. क्त्वानिरूपणम्


॥ इति अनुक्रमणिका ॥


!!! टुंक समयमां बहार पडशे !!!

पू० मुनिराज श्री मनोहरविजयी म० कृत

– श्रीहेमचन्द्रिका व्याकरणनो –

सरल अने सुंदर गुजराती अनुवाद.

# ॥ शुद्धि पत्रकम् ॥

| पृष्ठपङ्क्ती | अशुद्धम् | शुद्धम् |
| --- | --- | --- |
| १—५ | पटा० | पट्टा० |
| ४—६ | नासिक यो० | नासिकयो० |
| ५—१ | योऽथवान् | योऽर्थवान् |
| ६–१७ | स्वे | अस्वे |
| ६–१७ | ऋृवर्णं० | ऋृवर्णं० |
| ७—६ | ने+अक: | नै+अक: |
| ७—६ | ते+श्र | ते+अत्र |
| ७–१३ | विरामें | विरामे |
| ६—४ | वाक्छुर: | वाक्छूर: |
| १२—६ | दीघश्च | दीर्घश्च |
| १३—६ | इति | इत्यादयो निपातनाद् |
| १५—७ | पुंलि० | पुंलि |
| १५–१० | जस् | शस् |
| १६—६ | देव+ | जिन+ |
| १६—६ | देवान् | जिनान् |
| १७—६ | स्यात् तिसृ ...त्वा ॥६॥ | स्यात् ॥६॥ |
| १७–११ | स्यात् । जिन+। | स्यात्, तिसृ-चतसृ-षान्त रान्तं वर्ज-यित्वा । जिन+ |
| १७–१२ | +ङि० | +ङि० |

| पृष्ठपङ्क्ती | अशुद्धम् | शुद्धम् |
| --- | --- | --- |
| १६—४ | र-ष- | र– ह– ष– |
| १६—८ | –पद् | –पद् वा |
| १६-१६ | ‘सह इत | सह ‘इत |
| २०—६ | ङौ | डौ |
| २०-१५ | ना ङिदेत् | नाङिदेत् |
| २३—६ | प्रकरणम् ॥ | प्रकरणम् ॥७॥ |
| २३—७ | ॥ अथ | ॥८–अथ |
| २४—३ | सर्वादिः– | ङितां सर्वादिः– |
| २४-१३ | ‘दै-ङे | ‘ङे-दै |
| २५-१२ | प्रकरणम् ॥ | प्रकरणम् ॥८॥ |
| २५-१३ | ॥ अथ | ॥६–अथ |
| २६-१४ | दधिनि | दधनि |
| २७—३ | प्रकरणम् ॥ | प्रकरणम् ॥६॥ |
| २७—४ | ॥ अथ | ॥१०–अथ |
| ३०—५ | ऋभुक्षन्’ | ऋभुक्षिन्’ |
| ३०-११ | बा आ | वा ओ |
| ३१-१४ | स्यादौ | स्यादौ च |
| ३१—७ | चतुर्। | चतुर् |
| ३२—१ | दसो मात् दो | दसो दो |
| ३२—२ | अदसौ | अदसो |
| ३२-११ | मुह्-द्रुह्- | मुह्-दुह्-द्रुह- |

| पृष्ठपङ्क्ती | अशुद्धम् | शुद्धम् | पृष्ठपङ्क्ती | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|
| ३२–१३ | गोधुक्, गोधुक् | गोधुक्, गोधुट् | ४८—३ | बित्यं | नित्यं |
| ३२–१६ | प्रकरणम् ॥ | प्रकरणम् ॥१०॥ | ४९—३ | ऊडन्तं | ऊङन्तं |
| ३४–१४ | लुपि अरे | लुपि परे | ५०–१५ | मात्रा | माता |
| ३६—१ | -युंष्य | -युँष्म | ५१—६ | राजगवी राजसखः | राजसखः |
| ३८—६ | यत्र व्येति | यत्र व्येति | ५१–१४ | ।मध्याह्नः | ।सर्वाह्णः, मध्याह्नः |
| ४१—३ | कण्ठात् तु | कण्ठान्तात् तु | ५२—२ | अदन्तादु | अदन्ताद् |
| ४५–१६ | विभत्ति- | विभक्ति- | ५६—५ | क्व इइ | क्व इह |
| ४६—१ | युग्पत् | युगपत् | ५७—२ | युमष्माकं | युष्माकं |
| ४६–१० | ०कुम्भेन | ०कुम्भेन | ५८—२ | वाङ्गमयम् | वाङ्मयम् |
| ४६–१२ | अवघारणे | अवधारणे | ५८—६ | स्तात् स्यात्। ।जनि | सात स्यात्। राजनि |
| ४७—६ | युद्धं | युद्धे | | | |

| पृष्ठपङ्क्तौ | अशुद्धम् | शुद्धम् | पृष्ठपङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|
| ५९–१३ | –दढा | दृढा | १२१–११ | कर्मणो | कर्मणोः |
| ५९–१४ | शुकिमा | शुक्लिमा | १२३–१२ | वत्सयंति | वत्स्यंति |
| ६०—७ | प्रथममा | प्रथमा | १२६—९ | कृक्षि० | कुक्षि |
| ६४—६ | एकशो | एकशो | १२७–१० | ईदम् | इदम् |
| ६९–१० | सत्ताम्" | सत्तायाम्" | १२७–१२ | तादक्, | तादृक्, |
| ७३—६ | घिन्व-घि | धिन्व-धि | १२७–१३ | उपानात् | उपानत् |
| ७८—३ | आञ्छयात् | आञ्छ्यात् | १२९—५ | क्तयोर्नेट् भिन्नः | क्तयोर्नेट् ॥ भिन्न |
| ७८—५ | रूपात्यस्या | रूपान्त्यस्या | १३०—१ | क्षैशुष्– | क्षै– शुष्– |
| ७९—८ | ऋतयष्यते | ऋतयिष्यते | १३०–१५ | क्नुः सन् | क्नुः, सन् |
| १०८–१० | बोधो"। नाति | बोधने"। जानाति | १३२—४ | इत्युणादायो० | इत्युणादयो० |
| १११–११ | रवितं | रवितुं | १३२–१६ | व्यघः, | व्यधः, |
| ११९–१७ | धातुनामर्थे | धातूनामर्थे | १३३—७ | - घट- | -घट्ट- |
| | | | १३३–१५ | युधिदृशि | युधि-दृशि |

शासनसम्राट्-जगद्गुरु-तपोगच्छाधिपति-सूरिचक्र-
चक्रवर्त्ति-विविधतीर्थोद्धारक-सर्वतन्त्रस्वतन्त्र-
भूरिभूपालसन्मानितपूजितपादपद्म-बालब्रह्मचारी-



परमपूज्याचार्यदेवेश
श्रीविजयनेमिसूरीश्वरजी म० सा०

शासनसम्राट्श्रीजीना पट्टालंकार-व्याकरणवाचस्पति-
शास्त्रविशारद-कविरत्न-सातलाखश्लोकप्रमाण-
नूतनसंस्कृतसाहित्यसर्जक-अनुपमव्याख्यानसुधावर्षी



पूज्यपादाचार्यदेव
श्रीविजयलावण्यसूरीश्वरजी म० सा०

॥ ॐ अर्हं नमः ॥

॥ कलिकालसर्वज्ञाय श्रीहेमचन्द्रसूरीश्वराय नमः ॥

॥ जगद्गुरु–श्रीविजयनेमिसूरीश्वराय नमः ॥

तपोगच्छाधिपति–सर्वतन्त्रस्वतन्त्र–श्रीविजयनेमि-
सूरीश्वरपटालंकारेण 'व्याकरणवाचस्पति–
शास्त्रविशारद–कविरत्न' इति पदालंकृतेन
श्रीविजयलावण्यसूरिणा निर्मिता—

# श्रीहेमचन्द्रिका

नत्वा श्रीनेमिनामानमाजन्मब्रह्मचारिणम् ।
तीर्थनाथं गुरुं चैव भारतीं जिनभाषिताम् ॥१॥
कलिकाले च सर्वज्ञं स्मृत्वा श्रीहेमसूरिपम् ।
शिशूनां सुखबोधाय संक्षिप्तां सरलां तथा ॥२॥
मनोहरस्य विज्ञप्त्या श्रितां शब्दानुशासनम् ।
करोति हेमचन्द्रिकां लावण्यसूरिरादरात् ॥३॥

अर्हं प्रणिदध्महे ॥१॥

शब्दानामुत्पत्तिर्ज्ञानं च स्याद्वादाद् भवति ॥२॥

## ॥ १—अथ संज्ञाप्रकरणम् ॥

'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ' इति १४ चतुर्दश स्वराः ॥३॥

एकमात्रो ह्रस्वः, द्विमात्रो दीर्घः, त्रिमात्रः प्लुतः; यथा—अ आ आ३ इति।

अक्षिनिमीलने उन्मीलने वा यावान् कालः स मात्रा ॥४॥

अआरहिता द्वादश १२ स्वरा नामिनः ॥५॥

ऌकारपर्यन्ता दश १० स्वराः समानाः ॥६॥

'ए ऐ ओ औ' इति चत्वारि ४ सन्ध्यक्षराणि ॥७॥

उपरि बिन्दुः—अनुस्वारः, पार्श्वस्थबिन्दुयुगलं—विसर्गः, यथा—अं अः ॥८॥

'क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श स ष ह' इति ३३ त्रयस्त्रिंशद् व्यञ्जनानि ॥

अनुस्वार-विसर्गयोरपि व्यञ्जनसंज्ञा ॥९॥

'ङ ञ ण न म य र ल व'भिन्नं व्यञ्जनं घुट् ॥१०॥

पञ्च वर्गाः—'क ख ग घ ङ' इति कवर्गः, 'च छ ज झ ञ' इति चवर्गः, 'ट ठ ड ढ ण' इति टवर्गः, 'त थ द ध न' इति तवर्गः, 'प फ ब भ म' इति पवर्गः ॥११॥

'क ख च छ ट ठ त थ प फ श ष स' इति १३ त्रयोदश अघोषाः ॥१२॥

तदन्यद् व्यञ्जनं घोषवत् ॥१३॥

'य र ल व' इति ४ चत्वारोऽन्तस्थाः ॥१४॥

अनुस्वार विसर्ग ⌣क )(प श ष स' इति ७ सप्त शिट् ॥१५॥

अवर्ण-ह्-विसर्ग-कवर्गाः—कण्ठ्याः । इवर्ण-चवर्ग-य-शाः—तालव्याः । उवर्ण-पवर्ग-उपध्मानीयाः—ओष्ठ्याः। ऋवर्ण-टवर्ग-र-षाः—मूर्धन्याः। लृवर्ण-तवर्ग-ल-साः—दन्त्याः । ए ऐ—तालव्यौ । ओ औ—ओष्ठ्यौ । वः—दन्त्योष्ठ्यः । ⁐ पः—उपध्मानीयः । ⨯कः—जिह्वामूलीयः । नासिकयोच्चार्यमाणः—अनुनासिकः । 'ङ ञ ण न म' इति अनुनासिकाः । 'य ल व' इति अनुनासिका अपि ॥१६॥

अष्टादशभेदोऽवर्णः परस्परं स्वः । एवम्-इवर्णं उवर्णं ऋवर्णं लृवर्णं च ज्ञेयम् । द्वादश-भेदानि सन्ध्यक्षराणि । तत्र एकार एकारं प्रति, ऐकार ऐकारं प्रति, ओकार ओकारं प्रति, औकार औकारं प्रति स्वः । पञ्च वर्गाः परस्परं स्वः । 'य ल व' इति सानुनासिका निरनुनासिकाश्च परस्परं स्वः ॥१७॥

विभक्त्यन्तं पदम् ॥१८॥

सविशेषणं क्रियापदं वाक्यम् ॥१९॥

धातु-विभक्त्यन्त-वाक्यभिन्नो योऽर्थवान् शब्दः स नाम ॥२०॥

इह शास्त्रे य उपदिश्यते प्रयोगे च न दृश्यते स इत्, तस्य च लोपो भवति ॥२१॥

पञ्चम्यर्थाद्—विहितोऽन्तशब्दानिर्दिष्टश्च प्रत्ययः ॥२२॥

इति श्रीहेमचन्द्रिकायां संज्ञाप्रकरणम् १ ॥

## ॥ २–अथ स्वरसन्धिः ॥

समानस्य परेण तेन समानेन सह दीर्घो भवति । जिन+आद्यः—जिनाद्यः । दधि+इदम्-दधीदम् । भानु+उदयः—भानूदयः । पितृ+ऋषभः—पितृषभः । क्लृ+लृकारः-क्लृकारः ॥१॥

अवर्णस्य इवर्णेण सह ए, उवर्णेन सह ओ, ऋवर्णेन सह अर्, लृवर्णेन सह अल् भवन्ति। जिन+इन्द्रः—जिनेन्द्रः। तव+उदयः—तवोदयः। महा+ऋषिः—महर्षिः । लिखित+लृकारः—लिखितल्कारः ॥२॥

क्वचिद् आर् भवति। प्र+ऋणम्–प्रार्णम्। शीत+ऋतः—शीतार्तः । प्र+ऋच्छति–प्रार्च्छति ॥३॥

अवर्णस्य परेण एकारेण ऐकारेण सह च ऐ, ओकारेण औकारेण सह च औ स्यात्। तव+एषा—*तवैषा । तव+ऐश्वर्यम्—तवैश्वर्यम्। तव+ओदनः—तवौदनः। तव+औकारः—तवौकारः* ॥४॥

अवर्णस्य क्वचित् लोपो भवति। अद्य+एव—अद्येव गच्छ। बिम्ब+ओष्ठी—बिम्बोष्ठी। अद्य+ओम्—अद्योम्। प्र+एलयति—प्रेलयति ॥५॥

स्वे स्वरे परे-इवर्णस्य य्, उवर्णस्य व्, ऋवर्ण-

स्य र्, लृवर्णस्य च ल् भवति। दधि+अत्र—दध्यत्र। मधु+अत्र—मध्वत्र। पितृ+अर्थः—पित्रर्थः। लृ+आकारः—लाकारः ॥६॥

स्वरे परे—एकारस्य अय्, ऐकारस्य आय्, ओकारस्य अव्, औकारस्य च आव् स्यात्। ने+अनम्—नयनम्। ने+अकः—नायकः। लो+अनम्—लवनम्। लौ+अकः—लावकः ॥७॥

पदान्तस्थात् एत ओतश्च परस्य अकारस्य लुक् स्यात्। ते+अत्र—तेऽत्र। पटो+अत्र—पटोऽत्र ॥८॥

॥ इति श्रीहेमचन्द्रिकायां स्वरसन्धिः २ ॥

## ॥ ३-अथासन्धिः ॥

विरामें न सन्धिः। दधि अत्र ॥१॥

द्विवचनान्तस्थस्य 'ई ऊ ए' इत्यस्य न सन्धिः। मुनी इह, साधू एतौ, माले इमे ॥२॥

अदसः 'मु मी' इत्यस्य न सन्धिः। अमी अश्वाः ॥३॥

स्वररूपस्य ओकारान्तस्य च चादेर्न सन्धिः। अ अपेहि, अहो अत्र। आङस्तु भवति। आ+उष्णम्—ओष्णम् ॥४॥

प्लुतस्य इकारस्य वा सन्धिः। लुनीहि३ इति, लुनीहीति ॥६॥

॥ इति श्रीहेमचन्द्रिकायामसन्धिः ३ ॥

## ॥ ४–अथ व्यञ्जनसन्धि ॥

पदान्ते धुटः स्थाने वर्गतृतीयः स्यात्। सत्+मन्दिरं—सद्मन्दिरम् ॥१॥

पञ्चमे परे पदान्तस्थवर्गतृतीयस्य पञ्चमो वा। सद्+मन्दिरम्—सन्मन्दिरम्, सद्मन्दिरम्। प्रत्यये तु नित्यम्। चिद्+मयं—चिन्मयम् ॥२॥

पदान्तस्थतृतीयात् परस्य हस्य पूर्ववर्गीय-

श्चतुर्थो वा । सम्पद्+हीनः=सम्पद्धीनः, सम्पद्हीनः ॥ ३ ॥

पदान्तस्थप्रथमात् परस्य शस्य छो वा । वाक्+शूरः=वाक्छूरः । घुटि तु न । वाक् श्च्योतति ॥ ४ ॥

पदान्तस्थस्य नस्य चछे परे–शः, टठे–षः, तथे सः, अनुस्वारानुनासिकौ च पूर्वस्य । भवान्+चरः=भवांश्चरः, भवाँश्चरः । प्रशान्शब्दे घुटि च न भवति ॥ ५ ॥

ह्रस्वात् परस्य छस्य नित्यं द्वित्वम्, दीर्घात् परस्य तु वा ॥ ६ ॥

अघोषे परे शिड्भिन्नघुटो नित्यं प्रथमः, विरामे तु वा । गच्छति, गछ्छति–गच्छति । कन्याच्छत्रम्, कन्याछत्रम् । शरत्, शरद् ॥ ७ ॥

स्वरे परे ह्रस्वात् परस्य 'ङ ण न' इत्यस्य द्वित्वं भवति । गच्छन्+अयं=गच्छन्नयम् ॥ ८ ॥

विरामे एकव्यञ्जने परे वा दीर्घभिन्नस्वरात् परस्य रहस्वरवर्जितवर्णस्य वा द्वित्वं भवति ॥९॥

तृतीये चतुर्थे वा परे धुटः स्थाने तृतीयः । दध्यत्र–दध्ध्–यत्र–दद्ध्यत्र, दध्यत्र ॥ १० ॥

स्वरात् पराभ्यां रहाभ्यां परस्य रहस्वर-वर्जितवर्णस्य वा द्वित्वम् । धर्मः, धर्म्मः ॥११॥

अपदान्तस्थस्य मस्य नस्य च धुड्वर्ग्ये तस्यैवाऽन्त्यः स्यात् । गम्+ता=गन्ता । शिटि हे च परे तु–अनुस्वारः । पुम्+सि=पुंसि ॥ १२ ॥

स्वागमस्य मस्य पदान्तस्थस्य च मस्य व्यञ्जने परे तस्यैव अनुस्वारानुनासिकौ स्याताम् । त्वम्+करोषि=त्वं करोषि, त्वङ् करोषि ॥ १३ ॥

तवर्गस्य श-चवर्गयोगे चवर्गः, ष-टवर्गयोगे च टवर्गः स्यात् । तत्+चारु—तच्चारु । तत्+टीका—तट्टीका ॥ १४ ॥

सस्य श-चवर्गयोगे-शः, ष-टवर्गयोगे च-षः । वृस्+चति—वृश्चति । दोस्+षु—दोष्षु ॥१५॥

शात् परस्य तवर्गस्य चवर्गो न ।
अश्नाति ॥ १६ ॥

पदान्तस्थटवर्गात् परस्य तवर्गस्य सस्य च टवर्ग-षौ न । षण् नयाः । नाम्-नगरी-नवतेस्तु भवति । षण्+नाम्—षण्णाम् ॥ १७ ॥

पदान्तस्थस्य तवर्गस्य षे परे टवर्गो न भवति । तीर्थकृत् षोडशः शान्तिः ॥ १८ ॥

पदान्तस्थस्य तवर्गस्य ले परे लो भवति । तत्+लूनं=तल्लूनम् । नस्य तु सानुनासिको लो भवति । भवान्+लुनाति=भवाँल्लुनाति ॥१९॥

॥ इति श्रीहेमचन्द्रिकायां व्यञ्जनसन्धिः ॥४॥

## ॥ ५–अथ रेफसन्धिः ॥

विरामे अघोषे च परे पदान्तस्थरस्य विसर्गः स्यात् । स्वः, अन्तः कमलम् ॥ १ ॥

शे षे से च परे पदान्तस्थरस्य श–ष–सा वा । कस्साधुः, कः साधुः ॥ २ ॥

पदान्तस्थरस्य चछे परे–शः, टठे परे षः, तथे च सः । कश्चरः ॥ ३ ॥

रे परे रलुक् स्यात्, 'अ इ उ' इत्यस्य दीर्घश्च । पुना रात्रिः ॥ ४ ॥

पदान्तस्थरस्य कखे परे ≍कः, पफे च– )(पो वा । क≍ करोति, कः करोति ॥ ५ ॥

क–ख–प–फे परे 'निर् दुर् बहिर् आविर् प्रादुर् चतुर्'शब्दानां रस्य षः स्यात् । निष्क्रियः ॥ ६ ॥

'कृ–कमि–कंस–कुम्भ–कुशा–कर्णी–पात्र'–शब्दस्थे के पे च परे अकारात् परस्याव्ययभिन्न-शब्दस्य रः 'सः' स्यात् । अयस्कृत् ॥ ७ ॥

भ्रातुर्+पुत्रः=भ्रातुष्पुत्रः । कर्+कः=कस्कः । अहर्+पतिः=अहर्पतिः, अहःपतिः, इति भवन्ति ॥ ८ ॥

॥ इति श्रीहेमचन्द्रिकायां रेफसन्धिः ॥ ५ ॥

## ॥ ६–अथ स्यादिसन्धिः ॥

पदान्तस्थस्य सस्य रुः स्यात् । उकार इत् । पयः ॥ १ ॥

अति घोषवति च परे अतः परस्य पदान्तस्थस्य रोः 'उः' स्यात् । देवोऽर्च्यः । धर्मो जेता ॥ २ ॥

घोषवति परे अवर्ण-भो-भगो-ऽघोभ्यः परस्य पदान्तस्थस्य रोर्लोपो भवति । देवा गच्छन्ति ॥ ३ ॥

स्वरे परे अवर्ण-भो-भगो-ऽघोभ्यः परस्य वस्य यस्य च वा लुक् भवति, तत्र न च सन्धिः । पट इह पटविह ॥ ४ ॥

स्वरे परे अवर्ण-भो-भगो-ऽघोभ्यः परस्य पदान्तस्थरोः 'यः' स्यात् । कर्+आस्ते= कयास्ते ॥ ५ ॥

स्वरे परे तदः सेर्लोपः, चेत् पादपूरणं प्रयोजनम् । 'सैष दाशरथी रामः, 'स एष भरतो राजा' ॥ ६ ॥

व्यञ्जने परे तद एतदश्च सिलोपः । स लाति ।

एष वर्त्ते। अकि नञ्समासे च न भवति। सको याति, असो वाति ॥ ७ ॥

॥ इति श्रीहेमचन्द्रिकायां स्यादिसन्धिः ॥ ६ ॥

इति पञ्चसन्धिप्रकरणम्

## ॥ अथ षड्लिङ्गप्रकरणम् ॥

तत्र—

## ॥ ७-स्वरान्तपुँलिङ्गप्रकरणम् ॥

विभक्तिर्द्विधा—स्यादिः, त्यादिश्च। तत्र स्यादिः सप्तधा, तथाहि—'सि औ जस्' प्रथमा, 'अम् औ जस्' द्वितीया, 'टा भ्याम् भिस्' तृतीया, 'ङे भ्याम् भ्यस्' चतुर्थी, 'ङसि भ्याम् भ्यस्'

पञ्चमी, 'ङस् ओस् आम्' षष्ठी, 'ङि ओस् सुप्' सप्तमी ॥ १ ॥

जिन+सि०स्=जिनः । जिन+औ=जिनौ। जस्-भ्याम्-ये स्यादौ परे अत आ स्यात् । जिन+ जस्० अस्=जिनाः ॥ २ ॥

समानात् परस्यामोऽकारस्य लुक् स्यात् । जिन+अम्=जिनम् । जिनौ ॥ ३ ॥

समानस्य शसोऽता सह दीर्घः, पुंसि च सस्य नः । देव+शस्०अस्=देवान् ॥ ४ ॥

अतः परस्य 'टा' इत्यस्य इन, 'ङस्' इत्यस्य च 'स्य' स्यात् । जिन+टा० आ=जिनेन । जिन+ भ्याम्=जिनाभ्याम् ॥ ५ ॥

अतः परस्य भिस 'ऐस्' स्यात् । जिन+भिस् =जिनैः ॥ ६ ॥

अतः परस्य 'ङे' इत्यस्य य, 'ङसि' इत्यस्य च आत् स्यात्। जिन+ङे० ए–जिनाय। जिनाभ्याम् ॥७॥

'भिस् भ्यस् ओस् सुप्' इति परेऽत ए। जिन+भ्यस्–जिनेभ्यः। जिन+ङसि० अस्–जिनात्। जिनाभ्याम्। जिनेभ्यः। जिन+ङस्० अस्–जिनस्य। जिन+ओस्–जिनयोः ॥८॥

ह्रस्वान्तात् आबन्तात् नित्यस्त्रीदूदन्ताच्च परस्य 'आम्' इत्यस्य नाम् स्यात्, तिसृ-चतसृ-षान्तरा-न्तं वर्जयित्वा ॥९॥

समानस्य नामि परे दीर्घः स्यात्। जिन+आम्–जिनानाम्। जिन+ङि० इ–जिने। जिनयोः ॥१०॥

नामि-अन्तस्था-कवर्गात् परस्य पदमध्ये वर्तमानस्य सस्यः षः स्यात्, शिड्-नान्तरेऽपि। जिन+सुप्०सु–जिनेषु ॥११॥

अत एतस्च परस्य सम्बोधनसेर्लुक् स्यात्। हे जिन!, हे जिनौ!, हे जिनाः! ॥ एवं–देवादयो

ज्ञेयाः ॥१२॥

१. सर्व, २. विश्व, ३. उभ, ४. उभयट्, ५. अन्य, ६. अन्यतर, ७. इतर, ८. डतरप्रत्ययान्त, ९. डतमप्रत्ययान्त, १०. त्व, ११. त्वत्, १२. नेम, १३-१४. सम-सिमौ सर्वार्थौ; १५. पूर्व, १६. पर, १७. अवर, १८. दक्षिण, १९. उत्तर, २०. अपर, २१. अधर व्यवस्थायाम्; २२. स्वमज्ञातिधनाख्यायाम्, २३. अन्तर बहिर्योगोपसंव्यानयोरपुरि, २४. त्यद्, २५. तद्, २६. यद्, २७. अदस्, २८. इदम्, २९. एतद्, ३०. एक, ३१. द्वि, ३२. युष्मद्, ३३. भवतु, ३४. अस्मद्, ३५. किम्, इति सर्वादिगणः। संज्ञायां न सर्वादिः। द्वन्द्वे न सर्वादिः केवलं जस ई वा ॥१३॥

अकारान्तसर्वादिसम्बन्धी जस्-इ०, ङे-स्मै०, ङसि-स्मात्, ङि-स्मिन्, स्यात्, पूर्वादिनवकस्य तु वा स्यात्। सर्वे, सर्वस्मै, सर्वस्मात्, सर्वस्मिन्। पूर्वे पूर्वाः, एवं तीयप्रत्ययान्तस्य ङ स्मात् स्मिन् वा।

द्वितीये द्वितीयाः ॥१४॥

अवर्णान्तसर्वादिसम्बन्धी आम् साम् स्यात् । सर्वेषाम् ॥१५॥

र-ष-ऋवर्णात् परस्य निमित्तेन सहैकपदे वर्तमानस्य अनन्तस्य च नस्य णः स्यात्, चवर्ग-टवर्ग-तवर्ग-ल-श-स-भिन्नवर्णव्यवधानेऽपि । सर्वेण ॥१६॥

शसादिस्यादौ परे मास-मास्, निशा-निश्, आसन-आसन्, दन्त-दत्, पाद-पद् स्यात् । मासान् मासः। पादान् पदः ॥१७॥

स्वरादिस्यादौ परे जराशब्दस्य जरस् वा स्यात् । निर्जरसौ निर्जरौ ॥१८॥

शसादिस्यादौ परे आकारलोपः स्यात्,आबन्ते घुटि तु न । हाहः ॥१९॥

औता सह 'इत ई, उत ऊ, च' स्यात्, खिशब्दे तु न । मुनी, साधू ॥२०॥

आमन्त्र्यसिना 'सह इत ए, उत ओ, ऋतः अर्' स्यात् । हे मुने ! हे साधो ! ॥२१॥

जसि परे 'इत ए, उत ओ' च स्यात् । मुनयः, साधवः ॥२२॥

पुंलिङ्गे इत उतश्च परस्य टाप्रत्ययस्य ना स्यात् । मुनिना, साधुना ॥२३॥

ङित्स्यादौ परे 'इत ए, उत ओ' च स्यात्, दिति तु न । मुनये, मुनेः, साधवे, साधोः ॥२४॥

एत ओतश्च परस्य 'ङसि-ङस्' प्रत्ययस्य रः स्यात्। मुनेः, साधोः ॥२५॥

इत उतश्च परस्य ङिप्रत्ययस्य डौ औ स्यात् । मुनौ, साधौ ॥२६॥

'ऋकारान्त-उशनस्-पुरुदंशस्-अनेहस्-सखि' शब्दात् परस्य सिप्रत्ययस्य डा आ स्यात् । सखा ॥२७॥

सखिशब्दस्य इतः शेषे घुटि परे ऐ स्यात्, शौ तु न । सखायौ ॥२८॥

केवलसखि-पतिशब्दे 'मा ङिवेत्' च न स्यात्, तथा ङि–औ स्यात् । सख्या, पत्या, सख्यौ पत्यौ ॥२९॥

'खि-ति-खी-ती'सम्बन्धिनो यात् परस्य 'ङसि-ङस्'प्रत्ययस्य उर् स्यात् । सख्युः, पत्युः ॥३०॥

डतिप्रत्ययान्त-षान्त-नान्तसंख्यावाचकशब्दसम्बन्धिनो जस्-शसो लुक् स्यात् । कति ॥३१॥

स्वे आमि परे त्रिशब्दस्य त्रयः स्यात् । त्रयाणाम् ॥३२॥

'त्यद्-तद्-यद्-अदस्-इदम्-एतद्-एक-द्वि'शब्दान्तस्य स्यादौ तसादौ च प्रत्यये परे अः स्यात् । द्वौ, द्वाभ्याम् । पपीः, पपीम्, पपीन्, पप्याम्, पपी ॥३३॥

स्वरादिप्रत्यये परे धातोः– इवर्णस्य इय्, उवर्णस्य च उव् स्यात् । नियौ ॥३४॥

नीशब्दस्य ङि-आम् स्यात् । नियाम् । लूः, लुवौ । संयोगादपि भवति-सुधियौ ॥३५॥

क्विबन्तेनैव यः समासस्तत्सम्बन्धिधातोः– इवर्णस्य य्, उवर्णस्य च व् स्यात् स्वरादौ स्यादौ परे, सुधीशब्दे तु न । ग्रामण्यौ, आमि ङौ च-ग्राम-

ण्याम्, सेनान्याम् ॥३६॥

स्वरादिस्यादौ परे, 'हन्भू-पुनर्भू-वर्षाभू-कारभू' इत्यत्र ऊतो व् स्यात् । हन्भ्वौ । हूहूः पपीवत् । यवलूः हन्भूवत् ॥३७॥

पुंसि शेषघुटि परे क्रोष्टु[क्रोश्-तु]शब्दस्य तु-स्थाने तृ स्यात्, टादौ स्वरादौ तु वा । क्रोष्टा ॥३८॥

तृप्रत्ययान्त-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षतृ-होतृ-पोतृ-प्रशास्तृ'शब्दस्य ऋतो घुटि आर् स्यात् । क्रोष्टारौ । क्रोष्ट्रा, क्रोष्टुना ॥३९॥

ऋतः परस्य 'ङसि-ङस्'प्रत्ययस्य डुर् [उर्] स्यात् । क्रोष्टुः, क्रोष्टोः । आमि 'क्रोष्टूनाम्' इत्येव नामादेशे स्वराभावात् ॥४०॥

घुटि ङौ च परे ऋतः 'अर्' स्यात् । क्रोष्टरि, क्रोष्टौ । पिता, पितरौ, पितरि । कर्ता, कर्तारौ । ना, नरौ ॥४१॥

नामि परे नुर्वा दीर्घः । नृणाम्, नृणाम् ॥४२॥

व्यञ्जनादिस्यादौ परे रैशब्दान्तस्य 'आ' स्यात् ।

सुराः, सुरायो, सुराभ्याम् ॥४३॥

घुटि परे ओत औ स्यात् । गौः, गावौ ॥४४॥

ओतः 'अम्-शसः' अता सह आ स्यात् । गाम्, गाः, गोः । ग्लौः, ग्लावौ ॥४५॥

॥ इति श्रीहेमचन्द्रिकायां स्वरान्तपुल्लिङ्ग-प्रकरणम् ॥

## ॥ अथ स्वरान्तस्त्रीलिङ्गप्रकरणम् ॥

'ङी-आप्'प्रत्ययान्ताद् दीर्घात् व्यञ्जनाच्च सेर्लुक् स्यात् । माला ॥१॥

आमन्त्र्यसिना सह, औता सह च, आप्-ए स्यात् । हे माले !, माले ॥२॥

'टा-ओस्'प्रत्यये परे आप्-ए स्यात् । मालया, मालयोः ॥३॥

आबन्तसम्बन्धी-ङे-यै, ङसि-यास्, ङस्-यास् ङि-याम् स्यात् । मालायै, मालायाः २, मालायाम् ॥४॥

नित्यादितो ह्रस्वराम्बार्थकस्य चामन्त्र्यसिना सह ह्रस्वः स्यात्। हे अम्ब ! । जरा, जरसौ, जरे ॥५॥

स्त्रियामाबन्तस्य सर्वादेः ङस्पूर्वा 'यै यास् २ याम्' स्युः । सर्वस्यै, सर्वस्याः २, सर्वस्याम् ॥६॥

स्त्रियामित उतश्च परः 'ङे-दै, ङसि-दास्, ङस्-दास्, ङि-दाम्' वा स्यात् । मत्यै, मतये, मत्याः, मतेः २, मत्यां, मतौ ॥७॥

स्त्रियां स्वरादिस्यादौ परे 'त्रि-तिसृ, चतुर्-चतसृ' स्यात् ॥८॥

स्त्रियां स्वरादिस्यादौ परे 'तिसृ-चतसृ'स्थस्य ऋतो रः स्यात् । तिस्रः २, तिसृणाम् । देवी, हे देवि ! ॥९॥

नित्यस्त्रीदूदन्तात् परः 'ङे-दै, ङसि-दास्, ङस्-दास् ङि-दाम्' नित्यं स्यात् । देव्यै, देव्याः २, देव्याम् । लक्ष्मीः । स्त्रीः ॥१०॥

स्वरादिस्यादौ परे स्त्रीवर्णस्य 'इय्' नित्यं स्यात्, अमि शसि तु वा । स्त्रियौ । स्त्रीं स्त्रियम्, स्त्रीः, स्त्रियः,

स्त्रियै, स्त्रियाः, स्त्रीणाम् स्त्रियाम् । श्रीः ॥११॥

'इय्-उव्'स्थानिनौ यौ नित्यस्त्रीदूतौ तदन्तात् स्त्री-वर्जात् परः 'ङे-दै, ङसि-दास्, ङस्-दास्, ङि-दाम्, आम्-नाम्' वा स्यात् । श्रियै श्रिये, श्रियाः श्रियः, श्रियां श्रीणाम्, श्रियि श्रियाम् । मतिवत् तनुः । देवीवत् वधूः । भ्रूः ॥१२॥

स्वरादिप्रत्यये परे 'भ्रू-भ्रू' इत्यूवर्णस्य 'उव्' स्यात् । भ्रुवौ, शेषं श्रीवत् । लूवत् भूः । कर्तृवत् स्वसा, पितृवत् माता, शसि च-स्वसॄः, मातॄः । सुरैवत् रै-शब्दः, राः । गोवत् द्योशब्दः ग्लौवत् नौः ॥१३॥

इति श्रीहेमचन्द्रिकायां स्वरान्तस्त्रीलिङ्ग-प्रकरणम् ॥

## ॥ अथ स्वरान्तनपुंसकलिङ्गप्रकरणम् ॥

नपुंसके 'सि-अम्' प्रत्ययस्य-अकारान्ते 'अम्'स्यात्, अनकारान्ते तु लुप् स्यात्, नाम्यन्ते वा लुक्

स्यात्, एकतरभिन्नेऽन्यादिपञ्चके च 'द्' स्यात्। धनम्, हे धन!। पयः। वारि, हे वारि! हे वारे!। अन्यत् ॥१॥

नपुंसके औ-ई स्यात्। धने ॥२॥

नाम्यन्तनपुंसकस्य स्वरादिस्यादौ परे नोऽन्तः स्यात्। वारिणी ॥३॥

नपुंसके 'जस्-शस्' शि स्यात् ॥४॥

शौ परे स्वरात् परो नः स्यात् ॥५॥

शेषघुटि परे यो नस्तस्मिन् परे दीर्घः स्यात्। धनानि। वारीणि, आमि तु नो न- वारीणाम् ॥६॥

स्वरादिटादिस्यादौ परे 'दधि-अस्थि-अक्षि'शब्दस्यान्तस्य 'अन्' स्यात् ॥७॥

ङी-घुड्भिन्नस्वरादिस्यादौ परे-अनोऽस्य लुक् स्यात्, 'ई-ङि'प्रत्यये तु वा, दध्ना, दधिनि दध्नि ॥८॥

विशेष्यवशात् नाम्यन्तो नपुंसकलिङ्गशब्दः स्वरादिटादौ परे पुंवत् वा स्यात्। कर्त्रा कर्तृणा कुलेन ॥९॥

नपुंसके ह्रस्वः स्यात् । श्रीपं कुलम् ॥१०॥

इति श्रीहेमचन्द्रिकायां स्वरान्तनपुंसकलिङ्ग-प्रकरणम् ॥

## ॥ अथ व्यञ्जनान्तपुंलिङ्गप्रकरणम् ॥

'अन्च्'धातुः पूजायां गतौ च, तत्र गतौ क्विपि न-लोपे 'अच्' भवति । अचो घुटि परे चात् प्राक् नः स्यात् ॥१॥

पदान्तस्थसंयोगान्तस्य लुक् स्यात् ॥२॥

'युज्-अन्च्-क्रुन्च्'शब्दनकारस्य ङः स्यात् । प्राङ् प्राञ्चौ ॥३॥

'णि-क्य-घुट्'वर्जिते यादि-स्वरादिप्रत्यये परे अ-च्- च्, उदच्- उदीच्, च स्यात्, पूर्वस्य च दीर्घः । प्राचः, प्रतीचः, उदीचः ॥४॥

अकारादौ 'अच्' इति परे 'तिरस्-तिरि' स्यात् । तिर्यङ्, तिरश्चः ॥५॥

'यज्-सृज्-मृज्-राज्-भ्राज्-भ्रस्ज्-व्रस्च्-परिव्राज्-शान्त'धातोः-चस्य जस्य शस्य च षः स्यात्। शब्दं पृच्छतीति-शब्दप्राट्, सम्राट्, शब्दप्राशौ, सम्राजौ ॥६॥

अनुनासिके क्विपि धुडादिप्रत्यये च परे धातोः- छ -स्य शः, वस्य च ऊट् स्यात् ॥७॥

'यभिन्नव्यञ्जनादौ सिति च प्रत्यये परे नाम पदं स्यात्। शब्दप्राड्भ्याम्, सम्राड्भ्याम् ॥८॥

धुटि पदान्ते च संयोगादिस्थस्य सस्य कस्य च लुक् स्यात्। भृड्, भृज्जौ। मरुत्, मरुतौ ॥९॥

घुटि परे ऋदुदितो धुटः प्राक् नः स्यात् ॥१०॥

शेषे घुटि परे 'न्सन्त-महत्'स्वरस्य दीर्घः स्यात्। महान्, महान्तौ ॥११॥

भ्वादिभिन्नस्य 'अतु-अस्' इत्यन्तस्य शेषे सौ दीर्घः स्यात्। भवान्, भवन्तौ, पठन्, पठन्तौ। 'मथ्'शब्दस्य-मत्, मथौ ॥१२॥

सौ परे द्विपर्यन्तत्यदादिशब्दस्य तः सः स्यात्।

सः, तौ, ते । एषः, एतौ, एते ॥१३॥

'द्वितीया-टा-ओस्' इति परेऽन्वादेशे त्यदादिसम्बन्धी एतद्-इदम् च- 'एनत्' स्यात् । एनम्, एतम् ॥१४॥

पदान्ते सादौ ध्वादौ च प्रत्यये परे ग-ड-द-बादे, चतुर्थान्तस्य, एकस्वरस्य धातुभागस्य आदेश्चतुर्थः स्यात् । भुत्, बुधौ भुद्भ्याम् ॥१५॥

'अहन्'भिन्ननाम्नो नस्य पदान्ते लुक् स्यात्, आमन्त्र्ये तु न । राजा, हे राजन् !, जञोर्ज्ञः, राज्ञः, राजनि राज्ञि ॥१६॥

वान्तात् मान्ताच्च संयोगात् परस्यानोऽस्य लुक् न स्यात् । आत्मनः ॥१७॥

'ङी-घुट्वर्जस्वरादि'स्यादौ परे 'श्वन्-युवन्-मघवन्-' शब्दस्य व-उ स्यात् । शुनः, शुना, यूनः, मघोनः ॥१८॥

'इन्-हन्-पूषन्-अर्यमन्' शब्दस्वरस्य 'शि-सि' प्रत्यये एव दीर्घः स्यात् । दण्डी, वृत्रहा ॥१९॥

कवर्गवति एकस्वरवति चोत्तरपदे सति पूर्वपदस्थ-रष्टवर्णात् परस्य उत्तरपदान्तस्य नागमस्य स्यादेश्च नस्य णः स्यात् । वृत्रहणौ ॥२०॥

हनो ह्नो घ्नः स्यात् । वृत्रघ्नः ॥२१॥

'पथिन्-मथिन्-ऋभुक्षन्' शब्दस्य-सौ परे नस्य आः, घुटि परे थस्य न्थ्, इकारस्य च आः स्यात्, ङी-घुट्वर्जस्वरादिस्यादौ च परे इन्-लोपः स्यात् । पन्थाः, पन्थानौ, पथः । पञ्च ॥२२॥

'रान्त-षान्त-नान्त' संख्यावाचिन आम्-नाम्-स्यात् । पञ्चानाम् ॥२३॥

स्यादौ परे 'अष्टन्'नस्य वा आ स्यात्, कृताकारस्य च 'जश्-शस्'लुक् स्यात् ।

अष्टौ, अष्ट, अष्टाभिः, अष्टभिः, अष्टानाम् ॥२४॥

तसादौ स्यादौ परे किमः कः स्यात् । कः कौ के ॥२५॥

सिना सह इदमः पुंसि-अयम्, स्त्रियाम्-इयम् स्यात् ॥२६॥

स्यादौ परे इदमो दस्य मः स्यात् । इमौ इमे ॥२७॥

'टा-ओस्' इति परे इदम्-अन स्यात् । अनेन ॥२८॥

व्यञ्जनादिस्यादौ परे इदम्-अ स्यात्, अकि तु न । आभ्याम्, एभिः, एषु ॥२९॥

घुटि परे 'अनडुह्-चतुर्' शब्दस्य उ-वा स्यात्, सम्बोधनसौ तु-व स्यात् । चत्वारः, चतुरः, चतुर्णाम् ॥३०॥

रुभिन्नरस्य सुपि र एव । चतुर्षु ॥३१॥

घुटि परे पुंसोः पुमन्स् स्यात् । पुमान्, पुमांसौ, पुंसः, पुंभ्याम् पुंसु ।

उशना, सम्बोधने-हे उशनन् ! हे उशन ! हे उशनः ! इति ज्ञेयम् । विद्वान् ॥३२॥

णिक्यघुट्वर्जे यादौ स्वरादौ मतौ च प्रत्यये परे वस्-उष् स्यात् । विदुषः ॥३३॥

'स्रंस्-ध्वंस्-सान्तक्वस्-अनडुह' शब्दान्तस्य पदान्ते दः स्यात् । विद्वद्भ्याम् ॥३४॥

सौ अदसो दः सः स्यात्, सिश्च डौ स्यात् । असौ ॥३५॥

अवर्णान्तादसो मात् दो मः स्यात् ॥३६॥

अदसौ मात् परस्य वर्णस्य उवर्णः स्यात्, दीर्घस्य दीर्घः, ह्रस्वस्य ह्रस्वः। कार्यान्तरात् पश्चात्, इनादेशात् तु प्रागेव। अमू ॥३७॥

बहुवचने मात् परस्य एत ई स्यात्। अमी, अमुना, अमुभ्याम्, अमीभ्यः ॥३८॥

अनडुहः सौ हात् प्राग् नः। अनड्वान् हे अनड्वन्! अनडुद्भ्याम् ॥३९॥

पदान्ते घुटि च परे ह्-ढ स्यात्। लिट्, लिड्, लिहौ ॥४०॥

घुटि पदान्ते च 'मुह्-द्रुह्-स्निह्-स्नुह्' शब्दस्य ह्-ढ वा स्यात्। भ्वादेर्दादेस्तु घः स्यात्। मुक्, मुट्, मुहौ। गोधुक्, गोधुक्, गोदुहौ, गोधुक्षु, कषयोः क्षः ॥४१॥

इति श्रीहेमचन्द्रिकायां व्यञ्जनान्तपुंलिङ्ग-प्रकरणम् ॥

## ॥ ११-अथ व्यञ्जनान्तस्त्रीलिङ्गप्रकरणम् ॥

पदान्ते धुटि परे च–चस्य कः, जस्य गश्च स्यात् । वाक्, वाग्, वाचौ । भाक्, भाग्, भाजौ । या, सा, एषा ॥१॥

शेषे घुटि अपो दीर्घः स्यात् । आपः, अपः ॥२॥

भादिस्यादौ परे अप्-अद् स्यात् । अद्भिः, अप्सु । ककुप्, ककुभ्, ककुभौ । इयम्, इमे, अनया, अस्यै । चतुर्–चतस्रः, चतसृभिः, चतसृणाम् ॥३॥

पदान्ते व्यञ्जनपरके रे वे च परे भ्वादेर्नामिनो दीर्घः स्यात्, न कुरुच्छुरः । गीः, गिरौ, गीर्भ्याम्, गीर्षु ॥४॥

सौ परे दिवो व औ स्यात् । द्यौः, दिवौ ॥ ५ ॥

दिवो व उ स्यात् पदान्ते, तस्य ऊ न । द्युभ्याम् ॥६॥

पदान्ते ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृष्-उष्णिह् 'शब्दस्यान्तस्य गः स्यात् । दिक्, दिग्, दिशौ । आशीः,आशिषौ । असौ, अमूः, अमूम्, अमूया,

अमुष्यै ॥७॥

इति श्रीहेमचन्द्रिकायां व्यञ्जनान्तस्त्रीलिङ्ग-
प्रकरणम् ॥११॥

## ॥ १२-अथ व्यञ्जनान्तनपुंसकलिङ्ग-प्रकरणम् ॥

जगत्, जगती । धुडन्तनपुंसकस्य शौ परे धुटः प्राग् नः स्यात् । जगन्ति । तुदत् ॥१॥

श्नावर्जात् अवर्णात् परस्य 'अतृ' स्थाने अन्तो वा स्यात्, 'ई-ङी' इति परे। तुदती, तुदन्ती । 'श्य-शव्'परस्य तु नित्यम्-दीव्यन्ती,पचन्ती । यत्, तत्, ब्रह्म, ब्रह्मणी ब्रह्माणि ॥२॥

क्लीबे आमन्त्र्यसौ परे नलुक् वा । हे ब्रह्मन् ! हे ब्रह्म ! । अहः, अह्नी, अहनी ॥३॥

'अहन्'शब्दनकारस्य पदान्ते रुः स्यात्, लुपि अरे तु-रः स्यात् । अहोभ्याम्, अहरधीते ॥४॥

शेषे घुटि अपो दीर्घः स्यात्, नागमे तु वा । पुंसि

-स्वाप्, क्लीबे-स्वाम्पि स्वम्पि कुलानि। इदम्, इमे, इमानि। किम्, के, कानि। चत्वारि। वाः, वारी, वारि। अदः, अमू, अमूनि ॥५॥

इति श्रीहेमचन्द्रिकायां व्यञ्जनान्तनपुंसकलिङ्ग-प्रकरणम् ॥१२॥समाप्तं च षड्लिङ्गप्रकरणम् ॥

## ॥ १३–अथ युष्मदस्मत्प्रक्रिया ॥

अकः प्राग् युष्मदस्मदोः क्रमेण–सिना सह त्वम् अहम्, जसा सह यूयम् वयम्, ङया सह तुभ्यम् मह्यम्, ङसा सह च तव मम स्यात् ॥१॥

युष्मदस्मद्भ्यां परस्य 'अम्–औ' इत्यस्य म् स्यात्, शसः-न्, ४भ्यसः–अभ्यम्, ५'ङसि-भ्यस्' इत्यस्य–अद्, आमः– आकम् च स्यात् ॥२॥

युष्मदस्मदोर्मान्तभागस्य क्रमेण- एकत्वे प्रत्यये उत्तरपदे स्यादौ च परे–त्व म स्यात्, द्वित्वे तु स्यादौ परे–युव आव स्यात् ॥३॥

पदात् परयोर्युष्यदोरेकवाक्ये 'शस्- ४भ्यस् ६ आम्' इत्यनेन सह–वस् नस्, '२-औ ४भ्याम् ६ ओस्' इत्यनेन सह-वाम् नौ 'ङे ङस्' इत्यनेन सह ते मे, अमा सह च–त्वा मा स्यात् ॥४॥

युष्मदस्मदोरन्तस्य–व्यञ्जनादिस्यादौ परे आ स्यात्, 'टा-ङि-ओस्' इति परे य् स्यात्, शेषस्यादौ तु लुक् स्यात् ॥५॥

## त्रिष्वपि लिङ्गेषु समानो दकारान्तो 'युष्मद्' शब्दः ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| त्वम् | युवाम् | यूयम् | प्रथमा । |
| त्वाम्–त्वा | युवाम्-वाम् | युष्मान्-वः | द्वितीया । |
| त्वया | युवाभ्याम् | युष्माभिः | तृतीया । |
| तुभ्यम्-ते | युवाभ्याम्-वाम् | युष्मभ्यम्-वः | चतुर्थी । |
| त्वत् | युवाभ्याम् | युष्मत् | पञ्चमी । |
| तव-ते | युवयोः-वाम् | युष्माकम्-वः | षष्ठी । |
| त्वयि | युवयोः | युष्मासु | सप्तमी । |

त्रिष्वपि लिङ्गेषु समानो दकारान्तो-ऽस्मद् शब्दः ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः । |
|---|---|---|---|
| अहम् | आवाम् | वयम् | प्रथमा । |
| माम्-मा | आवाम्-नौ | अस्मान्-नः | द्वितीया । |
| मया | आवाभ्याम् | अस्माभिः | तृतीया । |
| मह्यम्-मे | आवाभ्याम्-नौ | अस्मभ्यम्-नः | चतुर्थी । |
| मत् | आवाभ्याम् | अस्मत् | पञ्चमी । |
| मम-मे | आवयोः-नौ | अस्माकम्-नः | षष्ठी । |
| मयि | आवयोः | अस्मासु | सप्तमी । |

पादादौ न वस्-नसादि । युष्माकं वृषभः श्रिये ॥६॥

'च-अह-ह-वै-वा' शब्दानां योगेऽपि न वस्-नसादि । ज्ञानमस्मांश्च रक्षतु ॥७॥

दृश्यर्थे चिन्तनेऽपि न । जनोऽस्मान् वीक्ष्य मुक्तवान् ॥८॥

पूर्वमामन्त्र्यमसदिव । जना युष्मान् जिनोऽवतात्
॥९॥

इति श्रीहेमचन्द्रिकायां युष्मदस्मत्प्रक्रिया ॥१३॥

## ॥ १४–अथाव्ययप्रकरणम् ॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यत्र व्येति तदव्ययम् ॥१॥

स्वरादिरव्ययम् । स्वर् अन्तर् पुनर् प्रातर् इत्यादि ॥२॥

चादिरव्ययम् । च वा एव एवम् नूनम् इत्यादि । द्रव्ये तु न–चः शब्दः ॥३॥

चादिगतः प्रादिरव्ययम् । अस्योपसर्गसंज्ञा गतिसंज्ञा च ॥४॥

प्रपरापसमन्ववनिर्दुरभि–
व्यधिसूदतिनिप्रतिपर्यपयः ।
उप आङिति विंशतिरेष सखे !

उपसर्गगणः कथितः कविभिः ॥१॥५॥

तसादिप्रत्ययान्तमव्ययम् । देवा अर्जुनतोऽभवन्, ततः, तत्र, इत्यादि ॥६॥

विभक्त्यन्तसदृशमव्ययम् । चिरेण, चिरात् ॥७॥

'वत्-तसि-आम्-क्त्वा-तुम्'-प्रत्ययान्तं गतिसंज्ञं चाव्ययम् ॥८॥

अव्ययस्य स्यादेर्लुप् भवति ॥९॥

इति श्रीहेमचन्द्रिकायामव्ययप्रकरणम् ॥१४॥

## ॥ १५-अथ स्त्रीप्रत्ययप्रकरणम् ॥

अकारान्तनाम्नः स्त्रियाम् 'आप्' स्यात् । सुनन्दा ॥१॥

अजप्रभृतेः स्त्रियाम् 'आप्' स्यात्, न तु वक्ष्यमाणो ङीः । अजा, बाला, त्रिफला, अश्वा ॥२॥

आबेव परो यस्मात् तादृशे अनित्प्रत्ययावयवे के परे अत इ स्यात् । कारिका, यत्-तदादीनां तु

न ॥३॥

'ङी-आ-ई-ऊ' इत्यस्य के परे ह्रस्वः स्यात्। का-लिका, लक्ष्मिका ॥४॥

स्त्रियां नकारान्तात् ऋकारान्ताच्च ङीः स्यात्, स्वस्रादेस्तु न। राज्ञी, कर्त्री ॥५॥

'अण्-अञ्-एय-इकण्-नञ्-स्नञ्-टित्'प्रत्ययानां योऽत् तदन्तात् तेषामेव स्त्रियां ङीः स्यात् ॥६॥

अस्य ङ्यां लुक् स्यात् । ब्राह्मी, उभयी ॥७॥

मुख्यात् गौरादेः स्त्रियां ङीः स्यात्। गौरी ॥८॥

अन्त्यभिन्ने वयसि वर्तमानात् अदन्तात् स्त्रियां ङीः स्यात्। कुमारी ॥९॥

अदन्तसमाहारद्विगोः स्त्रियां ङीः स्यात्। त्रिपदी, द्वादशाङ्गी ॥१०॥

जातिवाचिनोऽदन्तात् स्त्रियां ङीः स्यात्, न तु यान्त-नित्यस्त्री-शूद्रात्। हंसी ॥११॥

सह-नञ्-विद्यमानवर्जितपूर्वपदात् क्रोडादिभि-न्नादकारान्तस्वाङ्गात् स्त्रियां वा ङीः स्यात्।

सुमुखी, सुमुखा । बहुस्वरात् संयोगोपान्त्यात् तु न. सुललाटा, सुपार्श्वा । नासिकोदरोष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गा-ऽङ्गा-गात्र-कण्ठात् तु भवत्यपि ॥१२॥

पालकान्तवर्जितात् सोऽयमित्यभेदोपचारेण स्त्रियां वर्तमानात् धववाचिनोऽकारान्तात् ङीः स्यात् । प्रष्ठी । वरुणादेस्तु धववाचिनो ङीयोगे आन् चान्तः । वरुणानी ॥१३॥

'नारी-सखी-पङ्गू-श्वश्रू'शब्दाः स्त्रियां ज्ञेयाः । एवं–युवतिः ॥१४॥

'खरु'वर्जात् उकारान्तगुणशब्दात् स्त्रियां वा ङीः मृद्वी, मृदुः ॥१५॥

क्त्यर्थप्रत्ययान्तवर्जात् इकारान्तात् स्त्रियां ङीर्वा स्यात् । भूमी, भूमिः ॥१६॥

उपमानादिपूर्वपदात् ऊरुशब्दात् स्त्रियाम् ऊङ् स्यात् । वामोरूः ॥१७॥

इति श्रीहेमचन्द्रिकायां स्त्रीप्रत्ययान्तप्रकरणम् १५॥

## ॥ १६–अथ कारकप्रकरणम् ॥

नाम्नः प्रथमा । जिनः । आमन्त्र्येऽपि प्रथमा । हे जिन ! ॥१॥

कर्त्रा क्रियया यद् विशेषेणाप्तुमिष्यते तत् कर्म, कर्मणि च द्वितीया । जिनं वन्दे ॥२॥

'समया-निकषा-हा-धिग्-अन्तरा-अन्तरेण-अति-येन–तेन' शब्दयोगे गौणान्नाम्नो द्वितीया । समया जिनमन्दिरम् ॥३॥

तसन्तेन सर्वोभया–ऽभि–परिणा योगे नाम्नो द्वितीया । गौणादिति सर्वत्र योज्यम् । सर्वतः श्रीविजयनेमिसूरिं ख्यातिः ॥४॥

स्वतन्त्रः कर्ता । साधकतमं करणम् । कञ्चित् प्रकारं प्राप्तस्य चिह्नम्–इत्थम्भूतलक्षणम् । हेतु--कर्तृ-करणेत्थम्भूतलक्षणे तृतीया । धनेन, जिनेन उपदिष्टम्, तपसा कर्माणि हन्ति, अपि त्वं कमण्डलुना छात्रमदाक्षीः ॥५॥

कर्मणा–व्याप्येन क्रियया वा यमभिप्रेयते-अनुग्रहा-

दिकाम्यया यमभिसम्बध्नाति स कर्माभिप्रेयः सम्प्रदानम्, तत्र चतुर्थी। शिष्याय धर्ममुपदिशति, जिनाय नमति ॥६॥

तादर्थ्ये चतुर्थी। मुक्तये तपः ॥७॥

'शक्तार्थ-वषड्-नमस्-स्वस्ति-स्वाहा-स्वधा' शब्दयोगे नाम्नश्चतुर्थी। नमोऽर्हते, स्वस्ति श्रीविजयनेमिसूरये ॥८॥

सावधिकगमने अवधिः-अपादानम्, तत्र पञ्चमी। आगच्छति ग्रामात् ॥९॥

क्रियाश्रयस्य कर्तुः कर्मणो वा आधारः-अधिकरणम्, तत्र सप्तमी। कटे आस्ते, दिवि देवाः, तिलेषु तैलम् ॥१०॥

स्वस्वामिभावादिसम्बन्धरूपे शेषेऽर्थे षष्ठी स्यात्। राज्ञः पुरुषः ॥११॥

कृतः कर्मणि कर्तरि च षष्ठी। गवां दोहः, भवत आसिका, कृत्यस्य तु वा- तव त्वया वाच्यम् ॥१२॥

'पृथक्-नाना' शब्दयोगे पञ्चमी तृतीया च। पृथक् मैत्रात् मैत्रेण वा ॥१३॥

'ऋते'शब्दयोगे द्वितीया पञ्चमी च। ऋते धर्मात् धर्मं वा न सुखम् ॥१४॥

विनायोगे द्वितीया पञ्चमी तृतीया च भवति। विना धर्मं धर्मात् धर्मेण कुतः सुखम् ॥१५॥

तुल्यार्थकयोगे तृतीया षष्ठी च। मातुः मात्रा वा तुल्यः समो वा ॥१६॥

यद्भावो भावलक्षणं तत्र सप्तमी। मनः प्रसन्नतामेति पूज्यमाने जिनेश्वरे ॥१७॥

इति श्रीहेमचन्द्रिकायां कारकप्रकरणम् ॥१६॥

## ॥ १७–अथ समासप्रकरणम् ॥

एकार्थीभावे सति नाम नाम्ना सह समस्यते ॥१॥

एकार्थीभावे स्यादेर्लुक् भवति। विस्पष्टं पटुः–विस्पष्टपटुः ॥२॥

एकमनेकं च समानाधिकरणं नाम, अव्ययं च नाम्ना सह द्वितीयाद्यन्यपदार्थे समस्यते स च बहुव्रीहिः ॥३॥

समासे प्रथमोक्तं प्राक् स्यात् । बहुव्रीहौ विशेषणं सर्वादि संख्यावाचि च प्राक् स्यात् । नतेन्द्रः । गौणस्याक्विपो गोङ्याद्यन्तस्यान्ते वर्तमानस्य ह्रस्वः स्यात्, अंशिसमासे 'ईयस्' प्रत्ययान्ते तु न ॥४॥

विशेष्यवशात् स्त्रीलिङ्गः समानाधिकरणे उत्तरपदे पुंवत् स्यात् । चित्रा गावोऽस्य स चित्रगुः ॥५॥

उष्ट्रमुखादयो बहुव्रीहिसमासा निपात्यन्ते । उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः ॥६॥

सहशब्दस्तृतीयान्तेन समस्यते स च बहुव्रीहिः ॥७॥

बहुव्रीहौ सहस्य सो वा । पुत्रेण सह सपुत्रः ॥८॥

रूढ्या दिग्वाचि दिग्वाचिना सह अन्तरालार्थे समस्यते स च बहुव्रीहिः । दक्षिणस्याः पूर्वस्याश्च यदन्तरालं सा दक्षिणपूर्वा अग्निकोणः ॥९॥

॥ इति बहुव्रीहिः ॥ १७ ॥

## ॥ १८-अथाव्ययीभावः ॥

'विभक्ति-समीप-समृद्धि-वृद्धि-अर्थाभाव-अत्यय-

असम्प्रति-पश्चात्-क्रम-ख्याति-युगपत्-सदृक्-सम्पत्-साकल्य–अन्त' एष्वर्थेषु वर्तमानमव्ययं नाम्ना सह पूर्वपदार्थे वाच्ये नित्यं समस्यते स चाव्ययीभावः ॥१॥

अनतोऽव्ययीभावस्य स्यादेर्लुप् स्यात्। स्त्रियामिति–अधिस्त्रि, अव्ययीभावस्य नपुंसकत्वात् ह्रस्वत्वम् ॥२॥

अतोऽव्ययीभावस्य पञ्चमीवर्जस्यादेः 'अम्' स्यात्, तृतीयासप्तम्योस्तु वा। कुम्भस्य समीपमिति-उपकुम्भमस्ति, उपकुम्भमुपकुम्भेन किम्? उपकुम्भमुपकुम्भे निधेहि ॥३॥

अवधारणे गम्ये यावत् नाम्ना समस्यते स चाव्ययीभावः। यावदमत्रं भोजय ॥४॥

योग्यता-वीप्साऽर्थानतिवृत्ति-सादृश्यार्थे वर्तमानमव्ययं नाम्ना समस्यते स चाव्ययीभावः। अनुरूपम्, प्रतिगृहम्, यथाशक्ति, सशीलमनयोः ॥५॥

'था' प्रत्ययान्तभिन्नं यथाऽव्ययं नाम्ना समस्यते

स चाव्ययीभावः । यथारूपं चेष्टते ॥६॥

मिथ आदाय इति क्रियाव्यतिहारे तृतीयान्तम्, मिथः प्रहृत्य इति क्रियाव्यतिहारे च सप्तम्यन्तं नाम समानरूपेण नाम्ना युद्धेऽन्यपदार्थे अव्ययीभावः समासः ॥७॥

युद्धे समासात् इच् स्यात् ॥८॥

अस्वरादौ इजन्ते उत्तरपदे पूर्वस्य दीर्घ आकारश्च । केशेषु केशेषु गृहीत्वा दण्डैर्दण्डैः प्रहृत्य कृतं युद्धमिति- केशाकेशि, दण्डादण्डि, एवं- मुष्टामुष्टि मुष्टीमुष्टि ॥९॥

॥ इत्यव्ययीभावः ॥ १८ ॥

## ॥१९-अथ तत्पुरुषः॥

धातोः सम्बन्धिनः प्रादय ऊरीप्रमुखाश्च गतिसंज्ञका भवन्ति ॥१॥

'गतिसंज्ञ-कु-निन्दाकृच्छ्रार्थकदुर्-पूजार्थकसु-पूजातिक्रमार्थकाऽति-अल्पार्थकाऽऽङ्'इत्येतत् नाम्ना नित्यं समस्यते स च तत्पुरुषः, बहुव्रीह्यादिलक्षणरहित-

श्चेत् । ऊरीकृत्य, प्रकृत्य, कुपुरुषः, दुष्पुरुषः, दुष्कृतम् सुराजा, अतिस्तुत्य, अतिराजा, आकडारः ॥२॥

गताद्यर्थाः प्रादयः प्रथमाद्यन्तैर्वित्यं समासः स च तत्पुरुषः । प्रगत आचार्यः-प्राचार्यः ॥३॥

द्वितीयाद्यन्तं नाम श्रितादिना समासः स च तत्पुरुषः । धर्मं श्रितः-धर्मश्रितः, जिनेन प्रोक्तः- जिनप्रोक्तः, जनाय हितं-जनहितम्, पापात् भयं- पापभयम्, जिनस्य देशना-जिनदेशना, समरे सिंहः-समरसिंहः ॥४॥

उत्तरपदे नञ् अ स्यात्, स्वरे तु अन् स्यात् । न पापम्-अपापम्, न आदिः-अनादिः, नखादिषु तु न-नखः ॥५॥

कृत्प्रत्ययविधायके ङसिना कथितं नाम कृदन्तेन नाम्ना नित्यं तत्पुरुषः समासः । कुम्भं करोतीति-कुम्भकारः ॥५॥ ॥ इति तत्पुरुषः ॥१६॥

## ॥ २०–अथ तत्पुरुषविशेषः कर्मधारयः ॥

विशेषणं विशेषेण सह समासः स च कर्मधारयः ।

नीलं च तत् उत्पलं च– नीलोत्पलम् ॥१॥

विशेष्यवशात् स्त्रीलिङ्गं नाम कर्मधारये उत्तरपदे परे पुंवत् स्यात्, ऊडन्तं तु न। रक्ता चासौ लता च- रक्तलता ॥२॥

॥ इति कर्मधारयः ॥२०॥

## ॥ २१–अथ कर्मधारयविशेषो द्विगुः ॥

संख्यावाचि परेण नाम्ना कर्मधारयसमासः स्यात् संज्ञा-तद्धितयोर्विषये उत्तरपदे समाहारे चार्थे, अ-यमेव चासंज्ञायां द्विगुश्च। पञ्चाम्राः, द्वैमातुरः, पञ्चगवधनः, त्रिपदी ॥१॥

॥ इति द्विगुः ॥२१॥

## ॥ २२–अथ द्वन्द्वः ॥

सहोक्तौ इतरेतरयोगे समाहारे चार्थे नाम नाम्ना समस्यते स च द्वन्द्वः। पार्श्ववीरौ, ऋषभाऽनन्त-धर्माऽराः ॥१॥

लघ्वक्षरं सखिवर्जेदुदन्तं स्वराद्यकारान्तम् अल्प-स्वरं पूज्यवाचि चैकं नाम द्वन्द्वे प्राक् स्यात्। तृण-

काष्ठम्, वायुतोयम्, इन्द्रचन्द्रौ, ऋश्यरोहितौ, श्रद्धामेधे ॥२॥

प्राणितूर्यंयोरङ्गानां स्वैर्द्वन्द्व एकार्थः, स च नपुंसके । कर्णनासिकम्, मार्दङ्गिकपाणविकम् ॥३॥

॥ इति द्वन्द्वः ॥२२॥

## ॥ २३–अथ एकशेषः ॥

समानार्थानां सहोक्तौ गम्यायामेकः शिष्यते । वक्रश्च कुटिलश्च-वक्रौ कुटिलौ वा ॥१॥

सर्वस्यादौ तुल्यरूपाणामेकः शिष्यते, संख्येये तु न । अक्षश्च अक्षश्च अक्षश्च- अक्षाः ॥२॥

अन्येन सहोक्तौ त्यदादिरेकः शिष्यते । स च चैत्रश्च–तौ ॥३॥

स्त्रियां सहोक्तौ पुमान् एकः शिष्यते । ब्राह्मणश्च ब्राह्मणी च- ब्राह्मणौ, एवं-भ्राता च स्वसा च- भ्रातरौ, पुत्रश्च दुहिता च–पुत्रौ । माता पिता–पितरौ ॥४॥

॥ इत्येकशेषः ॥२३॥

## ॥ २४—अथ समासान्तः ॥

राजन्-सखिशब्दान्तात् तत्पुरुषादट् स्यात् ॥१॥

नन्तस्यापदस्य तद्धिते परेऽन्त्यस्वरादेर्लुक् स्यात्। पञ्चराजी ॥२॥

अवर्णेवर्णस्य तद्धिते लुक् स्यात्, तद्धितलुकि तु न। राजगवी, राजसखः ॥३॥

गोशब्दान्ततत्पुरुषादट् स्यात्, तद्धितलुकि तु न। राजगवी ॥४॥

प्रमाणीशब्दान्तात् संख्यार्थाच्च बहुव्रीहेर्डः स्यात्। स्त्रीप्रमाणः, द्विः त्रयो, द्वौ वा त्रयो वा-द्वित्राः, वार्थे विकल्पार्थे वाऽत्र बहुव्रीहिः ॥५॥

सर्वात् अंशार्थात् अव्ययाच्च परो योऽहन्शब्दस्तदन्तात् तत्पुरुषादट् स्यात्, 'अहन्'शब्दस्य च 'अह्न' इत्यादेशः। मध्याह्नः। अहोरात्र इति निपातः ॥६॥

॥ इति समासान्तः ॥२४॥

## ॥ २५—अथालुक्समासः ॥

नाम्नि परात्मभ्यां परस्य ङेर्लोपो न। परस्मैपदम्,

आत्मनेपदम् ॥१॥

अदन्ताद् व्यञ्जनान्ताच्च परस्य सप्तम्या यथालक्ष्यं लुप् । कण्ठेकालः, युधिष्ठिरः, स्तम्बेरमः, पूर्वाह्णेतनः, सरसिजम् । क्वचित् षष्ठ्यादेर्लोपो न–देवानांप्रियः ॥२॥

॥ इत्यलुक्समासः ॥२५॥

## ॥ २६–अथ समासाश्रयविधिः ॥

बहुव्रीहौ सु-संख्यात् परस्य हस्त्यादिवर्जितोपमानात् परस्य च पादस्य पात् स्यात्। सुपात्, द्विपात्, व्याघ्रपात्, शसादिस्यादौ पादः पद् इति–सुपदः॥१॥

तत्पुरुषे कोः कत् स्यात् । कदन्नम्, पुरुषे तु वा–कापुरुषः, कुपुरुषः, उष्णे तु–'का–कव' इति वा–कोष्णं कवोष्णं कदुष्णम् ॥२॥

कृत्यप्रत्ययान्तोत्तरपदे अवश्यमो मो लुक् । अवश्यकार्यम् ॥३॥

तुमो मस्य मनः-कामे परे लुक् स्यात् । भोक्तुमनाः, गन्तुकामः ॥४॥

कर-घास-विशिष्टे उत्तरपदे महतो डा वा स्यात्, स्त्रियां तु नित्यम् । महत्करः, महाकरः, महत्याः करः—महाकरः । जातीये एकार्थे चोत्तरपदे महतो डा स्यात् । महाजातीयः, महावीरः ॥५॥

मयूरव्यंसकादयः समासाः साधवः ॥६॥

ऋदन्तानां द्वन्द्वे पूर्वस्य आ स्यात् । मातापितरौ, पुत्रेऽपि स्यात्—मातापुत्रौ ॥७॥

निरादेः परस्य वनस्य नो णः । शरवणम्, आम्रवणम् ॥८॥

पृषोदरादयः समासाः साधवः ॥९॥

॥ इति समासाश्रयविधिः ॥२६॥

इति श्रीहेमचन्द्रिकायां समासप्रकरणम् ॥२६॥

## ॥ २७—अथ तद्धितप्रकरणम् ॥

अणादिप्रत्ययस्तद्धितः ॥१॥

आ ऐ औ आर्-वृद्धिः ॥२॥

षष्ठ्यन्तादपत्येऽर्थे अणादिः स्यात् ॥३॥

ञिति णिति च तद्धिते परे स्वरेष्वाद्यस्वरस्य वृद्धिः स्यात् ।।४।।

परतः स्त्री जातिश्च णौ ये स्वरादितद्धिते च पुंवत् स्यात् । मरुदेव्या अपत्यं–मारुदेवः ।।५।।

उवर्णस्य तद्धिते परे अव् स्यात्, अपदान्ते, स्वयम्भुवश्च न । यदोरपत्यं–यादवः ।।६।।

'संख्या-सम्-भद्र'पूर्वात् मातृशब्दादपत्येऽर्थे अण् स्यात्, मातृशब्दस्य मातुर् स्यात् । द्वयोर्मात्रोरपत्यं–द्वैमातुरः ।।७।।

अदन्तादपत्येऽर्थे इञ् स्यात् । दक्षस्यापत्यं–दाक्षिः ।।८।।

पौत्रादि वृद्धम् ।।९।।

वृद्धेऽपत्यर्थे–बिदादेः 'अञ्' गर्गादेर्यञ्, नडादेश्च 'आयनण्' स्यात् । बैदः, गार्ग्यः, नाडायणः ।।१०।।

'ङी-आप्-ति-ऊङ्' प्रत्ययान्तात्, इञ्वर्जात् इदन्ताच्चापत्येऽर्थे एयण् स्यात् । सुपर्ण्या विनताया युवत्याः कमण्डल्वा अपत्यं–सौपर्णेयः, वैनतेयः, यौ-

वतेयः, कामण्डलेयः, नाभेरपत्यं–नाभेयः ॥११॥

बहुषु तद्धितस्य क्वचिल्लोपः । गर्गाः ॥१२॥

॥ इति अपत्याधिकारः ॥२७॥

तस्येदमित्यर्थे अणादिः । मथुराया इदमिति–माथुरम् ॥१॥

ईयादौ परेऽन्यस्य दोऽन्तः । अन्यस्येदमिति– अन्यदीयम् ॥२॥

त्यदादिर्दुसंज्ञः । अपत्यादेरन्यः प्राग्जितीयोऽर्थो हि शेषः । दुसंज्ञकात् शेषेऽर्थे ईयः स्यात् । तस्येदं–तदीयम् ॥३॥

तेन रक्तमित्यर्थे अणादिः । कुसुम्भेन रक्तं–कौसुम्भम् ॥४॥

चन्द्रयुक्तनक्षत्रार्थात् 'तेन युक्ते काले' इत्यर्थे अणादिः ॥ ५ ॥

'तिष्य-पुष्य'यकास्य नक्षत्राणि लोपः स्यात् । पुष्येण चन्द्रयुक्तेन युक्ता रात्रिः–पौषी ॥ ६ ॥

रथ-युग-प्रासङ्गात् तं वहतीत्यर्थे यः स्यात्, धुरस्तु य एयण् च । द्वौ रथौ वहतीति-द्विरथ्यः, धुरं वहतीति-धुर्यः, धौरेयः ॥ ७ ॥

तत्र भवेऽर्थे अणादिः । ग्रामे भवः—ग्राम्यः ॥८॥

'क्व-इइ-अमा' इत्यस्मात्, 'त्र-तस्'प्रत्ययान्ताच्च शेषेऽर्थे त्यच् स्यात् । क्व भवः—क्वत्यः, एवम्—इहत्यः, अमात्यः, तत्रत्यः, कुतस्त्यः ॥९॥

'सायम्-चिरम्-प्राह्णे-प्रगे' इत्यतःशेषेऽर्थे तनट् स्यात् । सायं भवः—सायंतनः,चिरंभवा-चिरन्तनी॥१०॥

'तद् वेत्ति अधीते वा' इत्यर्थे अणादिः । छन्दो वेत्ति अधीते वा-छान्दसः, न्यायादेस्तु इकण् ॥११॥

ञ्णति तद्धिते इवर्णोवर्णयोर्वृद्धिप्राप्तौ तयोरेव स्थाने यौ य्वौ पदान्तौ ताभ्यां प्राक् क्रमेण ऐ औ च स्यात् । न्यायमधीते वेत्ति वा—नैयायिकः, स्वश्वस्यापत्यं—सौवश्वः ॥१२॥

शेषेऽर्थे युष्मदस्मदः 'अञ् ईनञ्' स्यात्, तद्योगे च क्रमेण 'युष्माक अस्माक' एकत्वे तु 'तावक मामक'

इति स्यात् ॥१३॥

युमष्माकं युवयोर्वाऽयमिति–यौष्माकः, यौष्माकीणः, अस्माकमावयोर्वाऽयमिति–आस्माकः,आस्माकीनः, तवाऽयमिति– तावकः, तावकीनः, ममाऽयमिति–मामकः, मामकीनः, पक्षे ईये–युष्मदीयः, अस्मदीयः, त्वदीयः, मदीयः ॥१४॥

तृतीयान्तात् 'जित-जयत्–दीव्यत्–खनत्' इत्यर्थेषु इकण् स्यात् । अक्षैर्जितं जयति दीव्यतीति–आक्षिकम्, आक्षिकः, अभ्रेण खनतीति–आभ्रिकः ॥१५॥

प्रज्ञादेः स्वार्थे अण् । प्रज्ञ एव–प्राज्ञः ॥१६॥

यवादेः स्वार्थे कः । याव एव यावकः ॥१७॥

षष्ठ्यन्तात् समूहे अण् स्यात् । भिक्षायाः समूहः–भैक्षम् ॥१८॥

राजादेः समूहे अकञ् स्यात् । राज्ञां समूहः–राजकम् ॥१९॥

ग्रामादेः समूहे तल् स्यात् । ग्रामाणां समूहः–ग्रामता, जनानां समूहः–जनता ॥२०॥

विकारे अणादिः। हेम्नो विकारः–हैमी, एकस्वरात् तु मयट्-वाचो विकारः–वाङ्मयम् ॥२१॥

'तत्र साधुः' इत्यर्थे यः। सभायां साधुः– सभ्यः ॥२२॥

तस्मै हितमित्यर्थे यः। युगाय हितः–युग्यः। ईनोऽपि भवति– मातृभोगाय आत्मने सर्वजनाय वा हितः– मातृभोगीणः, आत्मनीनः, सर्वजनीनः ॥२३॥

सप्तम्यन्तात् अधीनेऽर्थे 'कृ-भू-अस्-सम्पद्'योगे स्तात् स्यात्। ाजनि अधीनं करोतीति–राजसात् करोति ॥२४॥

कर्मार्थात् कृगा योगे कर्त्रर्थाच्च भ्वस्तियोगे प्रागभूततद्भावे गम्ये च्विः स्यात् ॥२५॥

अवर्णस्य च्वौ ईः। प्रागशुकः शुकः स्यादिति–शुकीस्यात् ॥२६॥

क्वचित् डाच् भवति। सुखाकरोति गुरुम्, गुरोरनुकूलं करोति तमाराधयतीत्यर्थः ॥२७॥

त्याद्यन्त-सर्वादिस्वरेषु अन्त्यस्वरात् प्राक् 'अक्'

स्यात्, नित्यशब्दसंकीर्तनात् प्रागर्थेषु । कुत्सितमज्ञातमल्पं वा पचतीति-पचतकि, सर्वके, त्वकम्, अव्ययस्यापि तथा किन्तु अन्त्यकस्य दः स्यात् । कुत्सितमज्ञातमल्पं वा उच्चैः–उच्चकैः । पृथक्-पृथकत् ॥२८॥

षष्ठ्यन्ताद् भावे त्व तल् च स्यात् । शब्दस्य प्रवृत्तिहेतुर्गुणो भावः । गोर्भावो–गोत्वं गोता ॥२९॥

लघुरादिः समीपो येषां तादृशा ये इ-उ-ऋ-वर्णास्तदन्तेभ्यस्तस्य भावे कर्मणि चाणपि स्यात् । शुचेर्भावः कर्म वा-शौचम् ॥३०॥

क्वचिद् द्वयोः पदयोरादिस्वरवृद्धिः । सुहृदः सुभगस्य भावः– सौहार्दम्, सौभाग्यम् ॥३१॥

वर्ण-दृढादेर्भावे टचण् इमन् च वा स्यात् । शौक्ल्यम्, शुक्लिमा ॥३२॥

पृथ्वादेर्भावे इमन् वा । प्रथिमा, पृथुत्वम्, पृथुता, पार्थवम् ॥३३॥

पत्यन्त-राजान्त-गुणाङ्ग–राजादेर्भावे कर्मणि च

टचण् स्यात् । आधिपत्यम्, आधिराज्यम्, मौढचम्, राज्यम्, काव्यम् ॥३४॥

अर्हतो भावे कर्मणि च टचण् तद्योगे तस्य च नः । आर्हन्त्यम्, अर्हत्त्वम्, अर्हत्ता ॥३५॥

षष्ठ्यन्तात् सप्तम्यान्ताच्च इवार्थे वत् स्यात् । चैत्रवत् मैत्रस्य भूः, स्रुघ्नवत् साकेते परिखा ॥३६॥

प्रथमान्तात् षष्ठ्यर्थे सप्तम्यर्थे च वा मतुः, प्रथममान्तं चेत् अस्तीति समानाधिकरणं भवति । स्वस्ति आरोग्यमस्यास्तीति–स्वस्तिमान्, श्रीमान् ॥३७॥

मकारान्मकारोपान्ताच्च अवर्णादवर्णोपान्ताच्च पञ्चमरहितवर्गान्ताच्च नाम्नः परस्य मतोर्मस्य वः स्यात् । वृक्षा अस्मिन् सन्ति-वृक्षवान् पर्वतः, एवं–धनमस्यास्तीति–धनवान् ॥३८॥

अतोऽनेकस्वरात् व्रीह्यादेश्च मत्वर्थे इक इन् च स्यात् । दण्डिकः, दण्डी, व्रीहिकः, व्रीही ॥३९॥

'असन्त-तपस्-माया-मेधा-स्रज्'शब्दात् मत्वर्थे विन् स्यात् ॥४०॥

सान्तं नान्तं च नाम मत्वर्थे परे पदं न । यशस्वी, तपस्वी ॥४१॥

अभ्रादेर्मत्वर्थे अ स्यात् । अभ्राणि अस्मिन् सन्तीति-अभ्रं नभः ॥४२॥

प्राचुर्येण प्राधान्येन वा कृतं प्रकरणम्, तत्र स्वार्थे मयट् स्यात् । प्रकृतमन्नम्-अन्नमयम् ॥४३॥

प्रकृष्टेऽर्थे स्वार्थे तमप् स्यात् । अतिशयेन शुक्लः–शुक्लतमः ॥४४॥

द्वयोर्विभज्ये प्रकृष्टे तरप् स्यात् । द्वाविमौ पटू, अयमनयोः प्रकृष्टः पटुः– पटुतरः ॥४५॥

गुणप्रवृत्तिहेतुकात् तमप्-तरप्-विषये इष्ठ ईयसु च स्यात् ॥४६॥

णौ इष्ठे च परे बहु-भूय् स्यात् । अतिशयेन बहुः–भूयिष्ठः, भूयान् ॥४७॥

गुर्वादेर्गरादिश्च । अतिशयेनः गुरुः–गरिष्ठः, गरीयान्, गुरुतरः, गुरुतमः ॥४८॥

यत्-तत्-किमः संख्याया डतिर्वा स्यात् । याः ताः

काः संख्याः परिमाणमेषामिति–यति, तति, कति ॥४६॥

यत्-तत्–किमन्याद् द्वयोरेकस्मिन् निर्धार्ये डतरः, बहूनां प्रश्ने डतमश्च वा। कतरः, कतमः ॥५०॥

द्वेः संख्यापूरणे तीयः स्यात्, त्रेस्तृ च। द्वयोः पूरणः- द्वितीयः, त्रयाणां पूरणः–तृतीयः ॥५१॥

चतुरः थट् स्यात्। चतुर्णां पूरणः–चतुर्थः ॥५२॥

षडादेरपि। षण्णां पूरणः–षष्ठः, कतीनां पूरणः– कतिथः ॥५३॥

नान्तसंख्याया मट् स्यात्। पञ्चानां पूरणी- पञ्चमी ॥५४॥

संख्यापूरणे डट् स्यात्। एकादशानां पूरणी–एकादशी ॥५५॥

एकादश षोडश षोढा षड्ढा निपात्यन्ते ॥५६॥

'द्वि-त्रि-अष्टन्'शब्दानां 'द्वा त्रयस् अष्टन्' स्युः शतात् प्राक्, अशीतिबहुव्रीहौ तु न, चत्वारिंशदादौ तु वा। द्वादशी, त्रयोदशी,अष्टादशी, द्व्यशीति॥५७॥

विंशत्यादेर्वा तमट् । विंशतेः पूरणः-विंशतितमः, विंशः ॥५८॥

यत्-तद्-एतदो डावतु स्यात् । यत् परिमाणं यस्य यावान् ॥५९॥

प्रमाणात् मात्रट्, ऊर्ध्वप्रमाणात् दघ्नट्, द्वयसट् च वा स्यात्। जानु प्रमाणमस्य-जानुमात्रम्, जानुदघ्नम्, जानुद्वयसं जलम् ॥६०॥

तदस्य संजातमित्यर्थे तारकादेः 'इत' स्यात् । तारकाः संजाता अस्य- तारकितं नभः ॥६१॥

किमः त्याद्यन्तात् एकारान्तादव्ययाच्च परयोस्तमप्-तरपोरन्तस्य आम् स्यात् । इदमनयोरेषामतिशयेन किं पचतीति- किंतरां पचति, पचतितरां, पचतितमाम्, पूर्वाह्णेतराम्, सुतराम्, अतितराम् ॥६२॥

प्रकारे धा । द्वाभ्यां प्रकाराभ्यां-द्विधा ॥६३॥

वारे कृत्वस् । द्वौ वारौ-द्विकृत्वः ॥६४॥

वारे द्वि-त्रि-चतुरः सुच् । द्विः ॥६५॥

अवयवात् तयट् । द्वावयवौ यस्य–द्वितयम्, त्रितयम् ॥६६॥

द्वित्रिभ्यामयट् वा । द्वौ अवयवौ यस्य तत्–द्वयम्, त्रयम् ॥६७॥

संख्यावाचिन एकत्वविशिष्टवाचिनो वीप्सायां वा शस् । एकैकं ददाति-एकशो ददाति, माषं माषं ददाति–माषशो ददाति ॥६८॥

॥ इति श्रीहेमचन्द्रिकायां तद्धितप्रकरणम् ॥२७॥

॥ इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-जगद्गुरु-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न' इति पदालंकृतेन श्रीविजयलावण्यसूरिणा विरचितायां श्रीहेमचन्द्रिकायां पूर्वार्धं समाप्तम् ॥

॥ अर्हं ॥

# ॥ अथ श्रीहेमचन्द्रिकाया उत्तरार्धम् ॥

## ॥ १–त्यादिविभक्तिप्रकरणम् ॥

तिवादयः प्रत्यया धातोर्भवन्ति विभक्तिसंज्ञाश्च । सा च विभक्तिर्द्वेधा–

१–वर्तमाना–परस्मैपदम्, ※ आत्मनेपदम्,

| | एक-वचनम्, | द्वि-वचनम्, | बहु-वचनम्, | | एक-वचनम्, | द्वि-वचनम्, | बहु-वचनम्, |
|---|---|---|---|---|---|---|---|
| अन्यार्थे– | तिव्, | तस्, | अन्ति, | अन्यार्थे– | ते, | आते, | अन्ते, |
| युष्मदर्थे– | सिव्, | थस्, | थ, | युष्मदर्थे– | से, | आथे, | ध्वे, |
| अस्मदर्थे– | मिव्, | वस्, | मस् । | अस्मदर्थे– | ए, | वहे, | महे ॥१॥ |

एवमग्रेऽपि विज्ञेयम् । सर्वत्राऽन्त्यो वकार इत् ॥

२–सप्तमी– परस्मैपदम्, ※ आत्मनेपदम्,

| | | | | | |
|---|---|---|---|---|---|
| यात्, | याताम्, | युस्, | ईत, | ईयाताम्, | ईरन्, |
| यास्, | यातम्, | यात, | ईथास्, | ईयाथाम्, | ईध्वम्, |
| याम्, | याव, | याम । | ईय, | ईवहि, | ईमहि ॥२॥ |

※

३–पञ्चमी—परस्मैपदम् ※ आत्मनेपदम्,

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| तुव्, ताम्, अन्तु, | ताम्, आताम्, अन्ताम्, |
| हि, तम्, त, | स्व, आथाम्, ध्वम्, |
| आनिव्, आवव्, आमव् । | ऐव्, आवहैव्, आमहैव् ॥३॥ |

४–ह्यस्तनी–परस्मैपदम्, ※ आत्मनेपदम्,

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| दिव्, ताम्, अन्, | त, आताम्, अन्त, |
| सिव्, तम्, त, | थास्, आथाम्, ध्वम्, |
| अम्व्, व, म । | इ, वहि, महि ॥४॥ |

'दि-सि' इत्यत्रेकार उच्चारणार्थः, एवमुत्तरत्र ।

एताः–वर्तमाना-सप्तमी-पञ्चमी-ह्यस्तन्यः शित्संज्ञा ज्ञेयाः ॥

५–अद्यतनी–परस्मैपदम्, ※ आत्मनेपदम्,

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| दि, ताम्, अन्, | त, आताम्, अन्त, |
| सि, तम्, त, | थास्, आथाम्, ध्वम्, |
| अम्, व, म । | इ, वहि, महि ॥५॥ |

६–परोक्षा–परस्मैपदम्, ※ आत्मनेपदम्,

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| णव्, अतुस्, उस्, | ए, आते, इरे, |
| थव्, अथुस्, अ, | से, आथे, ध्वे, |

| | |
|---|---|
| णव्, व, म। | ए, वहे, महे ॥६॥ |
| णकार इत् ॥ | |

७—आशीः—परस्मैपदम्, ❋ आत्मनेपदम्,

| एक-वचनम्, | द्वि-वचनम्, | बहु-वचनम्, | एक-वचनम्, | द्वि-वचनम्, | बहु-वचनम्, |
|---|---|---|---|---|---|
| क्यात्, | क्यास्ताम्, | क्यासुस्, | सीष्ट, | सीयास्ताम्, | सीरन्, |
| क्यास्, | क्यास्तम्, | क्यास्त, | सीष्ठास्, | सीयास्थाम्, | सीध्वम्, |
| क्यासम्, | क्यास्व, | क्यास्म। | सीय, | सीवहि, | सीमहि ॥७॥ |

ककार इत् ॥

८—श्वस्तनी—परस्मैपदम् ❋ आत्मनेपदम्,

| | | | | | |
|---|---|---|---|---|---|
| ता, | तारौ, | तारस्, | ता, | तारौ, | तारस्, |
| तासि, | तास्थस् | तास्थ, | तासे, | तासाथे, | ताध्वे, |
| तास्मि, | तास्वस्, | तास्मस्। | ताहे, | तास्वहे, | तास्महे ॥८॥ |

९—भविष्यन्ती-परस्मैपदम्,❋ आत्मनेपदम्,

| | | | | | |
|---|---|---|---|---|---|
| स्यति, | स्यतस्, | स्यन्ति, | स्यते, | स्येते, | स्यन्ते, |
| स्यसि, | स्यथस्, | स्यथ, | स्यसे, | स्येथे, | स्यध्वे, |
| स्यामि, | स्यावस्, | स्यामस्। | स्ये, | स्यावहे, | स्यामहे ॥९॥ |

१०–क्रियातिपत्तिः-परस्मैपदम्, ※ आत्मनेपदम्,

| | |
|---|---|
| स्यत्, स्यताम् स्यन्, | स्यत, स्येताम्, स्यन्त, |
| स्यस्, स्यतम्, स्यत, | स्यथास्, स्येथाम्, स्यध्वम्, |
| स्यम्, स्याव, स्याम । | स्ये, स्यावहि, स्यामहि ।। १० ।। |

अत्रायं विवेकः—प्रत्येकं विभक्त्या अष्टादश प्रत्ययाः, तत्र-आद्यं नवकं 'शतृ-अत्' 'क्वसु-वस्' च परस्मैपदम्, अपरं नवकं 'कान-आन' 'आनश्-आन' चात्मनेपदम्; प्रतिनवकं त्रिकत्रयम्, तत्र-आद्यमन्यार्थे, द्वितीयं युष्मदर्थे, तृतीयं चास्मदर्थे; प्रतित्रिकमाद्य एकवचने, द्वितीयो द्विवचने, तृतीयः प्रत्ययो बहुवचने ॥

॥ इति स्यादिविभक्तिप्रकरणम्-१ ॥

卐

## ॥ २–अथ शव्विकरणो भ्वादिगणः ॥

आत्मनेपदं कृत्य-क्त-खलर्थाश्च प्रत्ययाः–सकर्मकाद् धातोः कर्मणि, अकर्मकादविवक्षितकर्मकाच्च भावे स्युः ॥ 'ध्यण्-तव्य-अनीय-य-क्यप्' इति पञ्च कृत्याः ॥१॥

इदितो ङितश्च धातोः कर्तर्यात्मनेपदं स्यात् ॥ ईदितो गितश्च धातोः फलवति कर्तर्यात्मनेपदं स्यात् ॥ शेषात्–आत्मनेपदनिमित्तादन्यस्माद् धातोः कर्तरि परस्मैपदं स्यात् ॥२॥

क्रियाऽर्थो धातुः ॥ "भू सत्तायाम्" अतः कर्तरि 'भू तिव्' इति स्थिते-अदादिवर्जधातोः कर्तरि शिति 'शव्–अः' स्यात् ॥ इवर्णस्य–ए, उवर्णस्य–ओ, ऋवर्णस्य-अर् गुणः ॥ नाम्यन्तस्य धातोः अक्ङिति-किद्-ङिद्वर्जे प्रत्यये पुसि पौ च गुणः स्यात् ॥ इति गुणे ओकारेऽवादेशे च–भवति। अवित् शित् प्रत्ययः ङिद्वत् स्यात् ॥ शवि गुणे–भवतः, पूर्वाकारलोपे–भवन्ति, भवसि, भवथः, भवथ। मादो वादौ च

प्रत्यये अत आः स्यात् ॥ भवामि, भवावः, भवामः। स भवति, त्वं भवसि, अहं भवामि ॥३॥

आत् परस्य सप्तम्या याशब्दस्य–इः, यामः–इयम्, युसः– इयुस् च स्यात् ॥ भवेत्, भवेताम्, भवेयुः, भवेः, भवेतम्, भवेत, भवेयम्, भवेव, भवेम ॥४॥

आशीरर्थे 'तु-हि'प्रत्यययोः 'तातङ्-तात्' वा स्यात् ॥ भवतु, भवतात्, भवताम्, भवन्तु। अतः प्रत्ययाद् हेर्लुक् स्यात् ॥ भव, भवतात्, भवतम्, भवत, भवानि, भवाव, भवाम ॥५॥

ह्यस्तन्यामद्यतन्यां क्रियातिपत्त्यां च विषये व्यञ्जनादिधातोः 'अट्-अः' स्यात्, स्वरादिधातोश्च वृद्धिः, न चेन्माङा योगः ॥ अकारस्य– आ, इवर्णस्य– ऐ, उवर्णस्य– औ, ऋवर्णस्य– आर् वृद्धिः ॥ अभवत्, अभवताम्, अभवन्, अभवः, अभवतम्, अभवत, अभवम्, अभवाव, अभवाम ॥६॥

अद्यतन्यां धातोः परः 'सिच्-स्' स्यात् ॥ 'पिबैति-दा-भू-स्था'धातोः परस्मैपदसिचो लुप् स्यात्, लु-

ब्योगे न चेट् ।। 'पिब' इति पानार्थक'पा'धातुः, 'एति' इति गत्यर्थकः स्मरणार्थकश्चादादिक 'इ' धातुः, 'दा' इति दासंज्ञको धातुः। दारूपो धारूपश्च योऽवित् धातुः स दासंज्ञः स्यात् ।। भवतेः सिचो लुपि गुणो न ।। वन्तभूपान्त्यस्य परोक्षा-ऽद्यतन्योः 'ऊ' स्यात् ।। अभूत्, अभूताम्, अभूवन्, अभूः, अभूतम्, अभूत, अभूवम्, अभूव, अभूम ।।७।।

परोक्षायां ङे च परे-धातुर्द्विः स्यात्, अनेकस्वरस्य धातोस्तु आद्य एकस्वरोंऽशो द्विः स्यात्, 'प्राक् तु स्वरे स्वरविधेः' इति आद्विर्वचनमधिकारः ।। परोक्षायां द्वित्वे पूर्वस्य– आदेरत आः, ऋदादेरश्नोतेः संयोगान्तस्य चादेरनातोऽस्य आः, भुवः– अः, स्वपः– उः, ज्या-व्ये-व्यधि-व्यचि-व्यथेः– इः, यजादिवश्-वचः–सस्वराऽन्तस्था य्वृत्–इ-उ-ऋरूपा स्यात् ।। कलि-हलिवर्जस्य नाम्यन्तधातोरन्तस्य ञ्णिति वृद्धिः स्यात्, जागुस्तु ञि-णव्येव ।। द्वित्वे सति पूर्वस्य– इकारस्य इय्, उकारस्य– उव् स्यात् अस्वे

स्वरे, ऋतः– अः, दीर्घस्य ह्रस्वः स्यात्, गस्य हस्य च जः, द्युतेः– इः, द्वितीयस्य प्रथमः, चतुर्थस्य तृतीयः, ष्ठिवः– तिः, अनादिव्यञ्जनस्य लुक् स्यात्, अघोषे शिटो लुक् स्यात्, कस्य चः, ङस्य ञः स्यात्॥ बभूव, बभूवतुः, बभूवुः। सृ-वृ-भृ-स्तु-द्रु-स्रु-श्रुवर्जात् स्कृगश्च धातोः परस्या व्यञ्जनादिपरोक्षाया आदिः 'इट्-इ' स्यात्॥ बभूविथ, बभूवथुः, बभूव, बभूविव, बभूविम ॥८॥

भूयात्, भूयास्ताम्, भूयासुः, भूयाः, भूयास्तम्, भूयास्त, भूयासम्, भूयास्व, भूयास्म ॥९॥

उणादि-अवर्जस्याशितः सादि-तादिप्रत्ययस्यादिरिट् स्यात्, धूग औदितश्च परस्य तु वा, एकस्वरादनुस्वारेतः परस्य तु न, क्रमस्त्वनात्मने॥ भविता, भवितारौ, भवितारः, भवितासि, भवितास्थः, भवितास्थ, भवितास्मि, भवितास्वः, भवितास्मः ॥१०॥

भविष्यति, भविष्यतः, भविष्यन्ति, भविस्यसि, भविष्यथः, भविष्यथ, भविष्यामि, भविष्यावः,

भविष्यामः ॥११॥

अभविष्यत्, अभविष्यताम्, अभविष्यन्, अभविष्यः अभविष्यतम्, अभविष्यत, अभविष्यम्, अभविष्याव, अभविष्याम ॥१२॥

पादीनां पिबादय आदेशा भवन्ति, अत्यादौ शिति। तथाहि– श्रु– शृ, किन्व्– कृ, घिन्व्– घि, पा– पिब, घ्रा– जिघ्र, ध्मा– धम, म्ना–मन, दा–यच्छ, दृश्– पश्य, ऋ– ऋच्छ, शद्– शीय, सद्– सीद, इति ॥ "पां– पा पाने" पिबति ४। अपात्, अपाताम्। सिच्प्रत्ययाद् विद्धातोश्च परस्यानः 'पुस्– उस्' स्यात्, न चेद् भुवः परः सिच्॥ अशिति क्ङिति स्वरे, इटि, एति, पुसि च परे आतो लुक् स्यात्॥ अपुः। आतः परस्य णव औः स्यात्॥ पपौ। इन्धेरसंयोगान्ताच्च परा अवित्परोक्षा किद्वत् स्यात्॥ पपतुः, पपुः। ऋ-वृ-व्येऽदः परस्य थव आदिरिट् नित्यं स्यात्, सृजो दृशः स्वरान्ताद् अकारवतश्च तृचि नित्यानिटः परस्य तु वा स्यात्, ऋदन्तात्

परस्य तु न ॥ पपिथ, पपाथ, पपिव, पपिम । गा-पा-स्था-सा-मा-हाकः क्ङिति आशिषि एः स्यात्, संयोगादेरादन्तस्य तु वा ॥ पेयात्, पाता, पास्य-ति ॥१३॥

"घ्रां- घ्रा गन्धोपादाने" जिघ्रति ४। 'ट्धे-घ्रा-शा-छा-सा' परस्य परस्मैसिचो वा लुक्, न चेट् ॥ अघ्रात्। यम्-रम्-नम्-आदन्तात् परस्य परस्मैसिच आदिरिट् स्यात्, एषां च सोऽन्तः ॥ सिजन्ताद् धातोरस्तेश्च परो दि-स्योरादिरीत् स्यात् ॥ इटः परस्य सिच ईति लुक् स्यात् ॥ अघ्रासीत्, अघ्रा-सिष्टाम्, जघ्रौ, घ्रेयात्, घ्रायात्, घ्राता ॥१४॥

"ध्मां- ध्मा शब्दा-ऽग्निसंयोगयोः" धमति, अ-ध्मासीत्, दध्मौ ॥१५॥

"ष्ठां- स्था गतिनिवृत्तौ" पाठे धात्वादेः षः सः स्यात्, न चेत् ष्टयै-ष्ठिव-ष्वष्कां सम्बन्धी स्यात् ॥ तिष्ठति, अस्थात्, तस्थौ, स्थेयात् ॥१६॥

"म्नां- म्ना अभ्यासे" मनति, अम्नासीत्, मम्नौ,

म्नेयात्, म्नायात् ॥१७॥

"दांम्- दा दाने" यच्छति, अदात्, देयात् ॥१८॥

"जिं- जि अभिभवे" जयति। अङिति परस्मै-सिचि समानस्य वृद्धिः स्यात् ॥ अजैषीत्, अजैष्टाम्। सन्-परोक्षयोर्द्वित्वे सति पूर्वात् परस्य-जेर्गिः, चेस्तु किर्वा स्यात् ॥ जिगाय। आशीर्य-च्वि-यङ्-यक्-क्ये दीर्घः स्यात् ॥ जीयात् ॥१९॥

"द्रुं- द्रु स्रुं- स्रु गतौ"। णि-श्रि-द्रु-स्रु-कमः कर्तर्यद्यतन्यां नित्यं 'ङ-अ', ट्धे-श्वेस्तु वा ॥ अदुद्रुवत्, असुस्रुवत्, दुद्रोथ, सुस्रोथ ॥२०॥

"स्मृं- स्मृ चिन्तायाम्" संयोगाद् य ऋत् तदन्तस्यार्तेश्च अकि परोक्षायां क्य-यङ्-आशीर्ये च गुणः स्यात् ॥ सस्मरतुः, सस्मर्थ, स्मर्यात्, स्मर्ता। हन ऋदन्ताच्च परस्य स्यस्यादिरिट् स्यात् ॥ स्मरिष्यति ॥२१॥

"औस्वृ-स्वृ शब्दोपतापयोः" स्वरति, अस्वार्षीत्, अस्वारीत्, स्वरिता, स्वर्ता, स्वरिष्यति ॥२२॥

"सृं–सृ गतौ" सरति । वेगे सर्तेर्धाव् स्यात्, शिति।। धावति । शास्ति-असू-व्यक्ति-ख्यातेः कर्तर्यद्यतन्याम्'अङ्-अ' नित्यम्,'सृ-ऋ' धातोस्तु वा । ऋवर्णदृशोऽङि गुणः स्यात् ।। असरत्, असार्षीत्, ससृव । ऋतः शे क्ये आशीर्ये च रिः स्यात् ।। स्त्रियात् ।।२३।।

"ऋं- ऋ प्रापणे गतौ च" ऋच्छति, आरत्, आर्षीत्, आरतुः, आरिथ, अर्यात्, अर्ता, अरिष्यति ।।२४।।

"तॄ प्लवन-तरणयोः" तरति, अतारीत् । 'ऋच्छ्-ॠदन्त-स्कृ'धातुनामिनोऽकि परोक्षायां गुणः । अ-वित्परोक्षा-सेट्थवोः परयोः– अनादेशादेर्धातोरेक-व्यञ्जनमध्यस्थातः, तॄ-त्रप्-फल्-भजां स्वरस्य च नित्यमेः, जॄ-भ्रम्-वम्-त्रस्-फण्-स्यम्-स्वन्-राज्-भ्राज्-भ्रास्-भ्लासां च वा एः, न च द्विः, शस-दद-वादि-गुणिनस्तु न ।। तेरतुः तेरिथ । अन्त्यो णव् वा णित् ।। ततर, ततार । ॠतः क्ङिति 'इर्' स्यात्, ओष्ठ्यात् परस्य तु 'उर्' स्यात् ।। तीर्यात् । 'ऋ-

दन्त-वृ' परस्येटो वा दीर्घः स्यात्,परोक्षायामाशिषि परस्मैसिचि तु न ।। तरीता, तरिता ।।२५।।

"ट्धें- पाने" धातोः सन्ध्यक्षरान्तस्य आः स्यात्, शिति तु न ।। धयति, अदधत्, अधात्, अधासीत्, दधौ, धेयात् ।।२६।।

"दैंव्-दै शोधने" दायति, दायात् । "ध्यैं-ध्यै चिन्तायाम्" ध्यायति ।। "म्लैं- म्लै कान्तिक्षये" म्लायति ॥ "गैं- गै शब्दे" गायति, गेयात् ।। "ष्ट्यैं-ष्ट्यै संघाते" ष्ट्यायति, तष्ट्यौ ।।२७।।

"शुच- शुच् शोके" धातोरुपान्त्यलघुनामिनोरक्ङिति गुणः स्यात् ।। शोचति ।। "अर्चं- अर्च् पूजायाम्" आनर्च ।।२८।।

"म्रुचू म्लुचू ग्लुचू गतौ" "ग्रुचू ग्लुचू स्तेये" ऊकार इत्, म्रोचति । 'ॠदन्त-श्वि-स्तम्भू-म्रुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-जॄ'धातोः कर्तर्यद्यतन्यां परस्मैपदे अङ् वा स्यात्, लृदित्-द्युतादि-पुष्यादेस्तु नित्यम् ।। अम्रुचत्, अम्रोचीत् ।।२९।।

"आछु-आञ्छ् आयामे" उदितो धातोः स्वरात् परो नोऽन्तः स्यात् ॥ आञ्छति, आञ्छ, आञ्छतुः, आञ्छयात् ॥३०॥

"व्रज-व्रज् गतौ" परस्मैपदे सेटि सिचि परे-व्यञ्जनादिधातोरुपान्त्यस्यातो वा वृद्धिः स्यात्, वद्-व्रज्-लान्त-रान्तधातोर्नित्यं स्यात्, एदितः श्वि-जागृ-शस्-क्षण्-हान्त-यान्त-मान्तस्य तु न ॥ अव्राजीत् । ञिति णिति च परे उपान्त्यस्यातो वृद्धिः ॥ वव्राज ॥३१॥

"त्यजं- त्यज् त्यागे" अनिटि परस्मैसिचि व्यञ्जनान्तधातुसमानस्य वृद्धिः,ऊर्णुगस्तु सेटि वा स्यात् ॥ अत्याक्षीत् । धुडन्त-ह्रस्वान्तधातोरनिट्सिचस्तादौ थादौ च लुक् स्यात् ॥ अत्याक्ताम्, अत्याक्षुः ॥३२॥

"ऋत- ऋत् घृणा-गति-स्पर्धेषु" गुपौ-धूप-विच्छ-पणि-पनेः- आयः, कमेः-णिङ्, ऋतेः- ङीयः स्वार्थे भवति, अशवि तु वा ॥ ऋतीयते, ऋतीयेत, ऋतीयताम्, आर्तीयत, आर्तीयिष्ट, आर्तीत् । अनेकस्वराद्

धातोः, 'दय्-अय्-आस्-कास्'धातोः, ऋच्छूर्णुव-र्जात् गुरुनाम्यादिधातोः परोक्षाया आम् नित्यं स्यात्, 'जागृ-उष्-समिन्ध्'धातोर्वा स्यात्, 'भी-ह्री-भृ-हु' धातोर्वा स्यात् स च तिव्वत्, वेत्तेर्वा स्यात् स च किद्वत्, आमन्ताच्चानन्तरं परोक्षान्तं कृभ्वस्ति प्रयुज्यते ।। आमः कृगः प्राग्वत् कर्तर्यात्मनेपदं भवति ।। ऋतीयाञ्चक्रे, आनर्त, ऋतीयिष्ट, ऋत्यात्, ऋतीयिता, अर्तिता, ऋतीयष्यते, अर्तिष्यति।।३३।।

"णद- णद् अव्यक्ते शब्दे" पाठे धात्वादेर्णो नः स्यात् ।। नदति । दुर्वर्जोपसर्गस्थादन्तःशब्दाच्च रादेः परस्य 'णोपदेश-हिनु-मीनाऽऽनि'सम्बन्धिनो नस्य णः स्यात् ।। प्रणदति, अनादीत्, अनदीत्, नेदतुः, ननाद, ननाद, ननद ।। "स्वन- स्वन् शब्दे" स्वेनुः, सस्वनुः ।।३४।।

"गुपौ- गुप् रक्षणे" गोपायति ४ । अदन्तधातोर-शिति अतो लुक् स्यात् ।। अगोपायीत्, अगोपीत्, अगौप्सीत्, अगौप्ताम्, अगौप्सुः, गोपायाञ्चकार,

गोपायाम्बभूव, गोपायामास, जुगोप, गोपाय्यात्, गुप्यात्, गोपायिता, गोपिता, गोप्ता ॥३५॥

"तपं– तप् धूप–धूप् संतापे" तपति, अताप्सीत्, तेपिथ, ततप्थ, धूपयति, अधूपायीत्, अधूपीत्, धूपायाञ्चकार, दुधूप ॥३६॥

"सृप्लृं– सृप् गतौ" सर्पति, असृपत् । अकिति धुडादौ प्रत्यये सृज्-दृशः स्वरात् परोऽत् अन्तः स्यात्, स्पृश-मृश-कृष-तृप-दृप-सृपस्तु वा । स्रप्ता, सर्प्ता ॥३७॥

"चमू– चम् अदने" चमति, अचमीत्, चेमुः । 'ष्ठिवू-क्लमू-आचमः" अत्यादौ शिति दीर्घः ॥ आचामति ॥३८॥

"क्रमू– क्रम् पादन्यासे" भ्रास-म्लास-भ्रम-क्रम-त्रसि-त्रुटि-लसि-यसि-संयसेः कर्तरि शिति 'श्यः-वो' वा स्यात् ॥ क्रमः परस्मैशिति दीर्घः, अत्यादौ ॥ क्रामति, क्राम्यति, अक्रमीत्, क्रमिता ॥३९॥

"यमूं– यम् उपरमे" 'गम्-इषत्-यमोऽत्यादौ शिति

छोऽन्तस्य ।। यच्छति, अयंसीत्, यन्ता, यङ्क्ष्यति ।। "स्यमू– स्यम् शब्दे" स्येमुः, सस्यमुः ।। "णमं– नम् नम्रत्वे" नमति, अनंसीत्, नेमुः, नन्ता ।।४०।।

"गम्लृं– गम् गतौ" गच्छति, अगमत् । गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक् ।। जग्मतुः, गन्ता । गमोऽशितः सादेरिट् स्यात्, आत्मनेपदे तु न ।। गमिष्यति ।।४१।।

"चर– चर् भक्षणे गतौ च" चरति, अचारीत् ।। "फल– फल् निष्पत्तौ" अफालीत्, फेलतुः ।।४२।।

"ष्ठिवू– ष्ठिव् निरसने" ष्ठीवति । ष्ठिवो द्वित्वे पूर्वस्य तिर्वा स्यात् ।। तिष्ठेव, टिष्ठेव ।।४३।।

"दृशृं– दृश् प्रेक्षणे" पश्यति, अदर्शत् । से परे ष-ढोः कः स्यात् ।। अद्राक्षीत्, अद्राष्टाम्, ददर्श, ददृशु, ददर्शिथ, द्रष्टा, द्रक्ष्यति ।।४४।।

"कृषं– कृष् हलोत्कर्षणे" कर्षति, अकार्क्षीत्, अक्राक्षीत् । अदृशोऽनिटो नाम्युपान्त्यात् ह-शिडन्ताद्यतन्यां 'सक्-स' नित्यं, स्पृश-मृष-कृष-तृप-दृपस्तु

वा स्यात् ॥ अकृक्षत्, क्रष्टा, कर्ष्टा ॥४५॥

"उषू-उष् दाहे" ओषति, ओषाञ्चकार, उवोष॥ "हसे- हस् हसने" अहसीत् ॥ "शसू- शस् हिंसायाम्" शसति, शशास, शशसतुः ॥ "मिहं- मिह् सेचने" अमिक्षत् ॥ "मह- मह् पूजायाम्" अमहीत् ॥४६॥

॥ इति भ्वादौ परस्मैपदम् ॥२॥

## ३-अथात्मनेपदम् ॥

"एधि-एध् वृद्धौ" एधते। 'आताम्-आते-आथाम्-आथे' इत्येषामात इः स्यात् ॥ एधेते, एधेत, एधताम्, ऐधत, ऐधिष्ट, ऐधिषाताम्। अनतः परस्यात्मनेपदस्थस्य अन्तोऽत् स्यात् ॥ ऐधिषत। धातोर्धादौ प्रत्यये सो लुक् वा स्यात् ॥ ऐधिध्वम्, ऐधिड्ढ्वम्। एधांचक्रे। रान्त-नाम्यन्तधातोः परासां परोक्षाऽद्यतन्याशिषां धो ढः स्यात्, हाऽन्तस्थापरात् ञि-इटः परासां तु वा ॥ एधांचकृढ्वे, एधिषीष्ट, एधिता ॥१॥

"ष्वष्कि– ष्वष्क् गतौ" ष्वष्कते ॥ "पणि– पण् व्यवहार-स्तुत्योः" पणायति, अपणायीत्, अपणिष्ट ॥ "पनि– पन् स्तुतौ" पणिवत् ॥ "त्रपौषि– त्रप् लज्जायाम्" अत्रपिष्ट, अत्रप्त, त्रेपे ॥२॥

"कमूङ्– कम् कान्तौ" कान्तिरिच्छा, कामयते। असमानलोपे ङपरे णौ द्वित्वे पूर्वस्य लघुधात्वक्षरे सन्वत् कार्यं स्यात् ॥ सन्वत् कार्यमस्य इः। अस्व-रादेरसमानलोपे ङपरे णौ द्वित्वे पूर्वस्य लघोर्लघुनि धात्वक्षरे परे दीर्घः स्यात् ॥ 'समानलोपि-शासू-ऋदित्' वर्जधातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् ॥ अचीकमत, णिङभावे– अचकमत। 'आम्-अन्त-आलु-आय्य-इत्नु' इति परेषु णेरय् स्यात् ॥ काम-यांचक्रे, चकमे, कामयिषीष्ट, कामयिषी-ढ्वम्, ध्वम्, कमिषीध्वम् ॥३॥

"ओप्यायैङ्– प्याय् वृद्धौ" दीप-जन-बुधि-पूरि-तायि-प्यायः कर्तर्यद्यतन्यास्ते 'ञिच्– इ' वा स्यात्, तलुक् च ॥ अप्यायि, अप्यायिष्ट। परोक्षा-यङि प्या-

यः पीः ॥ पिप्ये ॥ "तायृङ्–ताय् संतान-पालनयोः" अतायि, अतायिष्ट ॥४॥

"अयि–अय् गतौ" "दयि–दय् दान-गति-हिंसा-दहन-रक्षणे" "कासृङ्–कास् शब्दरोगे" अयांचक्रे, दयांचक्रे, कासांचक्रे ॥ "टुभ्रासि–भ्रास् टुभ्लासृङ्–भ्लास् दीप्तौ" भ्रास्यते, भ्रासते, भ्रेसे, बभ्रासे, भ्लास्यते, भ्लासते, भ्लेसे, बभ्लासे ॥५॥

॥ इति भ्वादावात्मनेपदम् ॥३॥

## ४–अथोभयपदम् ॥

"श्रिग्-श्रि सेवायाम्" श्रयति, श्रयते, अशिश्रियत्, त, शिश्राय, शिश्रिये, श्रीयात्, श्रयिषीष्ट ॥ "णींग्–नी प्रापणे" नयति, नयते, अनैषीत्, अनेष्ट, निनाय, निन्ये ॥१॥

"डुकृंग्–कृ करणे" । कृग्-तनादेः कर्तरि शिति उः स्यात् ॥ अविति शिति य उस्तन्निमित्तस्य कृगोऽत उः स्यात् ॥ उ-श्नोरक्ङिति गुणः स्यात् ॥ करोति, कुरुते । कृगः परस्य उतोऽविति य-व-मा-

दिप्रत्यये लुक् स्यात् ।। कुर्वः, कुर्मः, कुर्यात्, अकार्षीत् । ऋवर्णान्तान्नाम्युपान्त्याच्च धातोरनिट्सिजाशिषौ किद्वत् ।। अकृत, कृषीष्ट । सम्-परेः कृगः 'स्सट्-स्' स्यात्, उपात् तु भूषादौ ।। संस्करोति, संचस्कार, संचस्करतुः, संचस्करिथ, संचस्करिव ।।२।।

"डुपचींष्- पच् पाके" अपाक्षीत्, अपक्त, पपाच, पेचे ।। "भजीं:- भज् सेवायाम्" भेजे ।। "राजृग्- राज् भ्राजि- भ्राज् दीप्तौ" रेजुः, रराजुः, रेजे, रराजे, भ्रेजे, बभ्राजे ।। "खनूग्- खन् अवदारणे" चख्नुः ।।३।।

।। इति भ्वादावुभयपदम् ।।४।।

## ५-अथ भ्वाद्यन्तर्गणो- द्युतादिः ।।

"द्युति- द्युत् दीप्तौ" द्योतते । द्युतादेरद्यतन्यां कर्तरि वाऽऽत्मनेपदम् । अद्युतत्, अद्योतिष्ट, दिद्युते ।।१।।

"ञिष्विदांङ्- स्विद् मोचन-स्नेहनयोः" । स्वेदते, अस्वेदिष्ट, अस्वदत्, सिष्विदे ।। "स्रंसूङ्- स्रंस् अवसने" स्रंसते, अस्रसत्, अस्रंसिष्ट, सस्रंसे ।।२।।

द्युताद्यन्तर्गणो वृतादिः ।

"वृतूङ्- वृत् वर्तने" वर्तते, अवृतत्, अवर्तिष्ट ।

वृदादेः स्य-सनोः कर्तरि वाऽऽत्मनेपदं स्यात् ॥

वृदादेः परस्य स्ताद्यशित आदिरिट् न, न चेदात्मनेपदनिमित्तम् ॥ वर्त्स्यति, वर्तिष्यते ॥३॥

॥ इति द्युतादिः ॥५॥

## ६-अथ भ्वाद्यन्तर्गणो ज्वलादिः ॥

"ज्वल- ज्वल् दीप्तौ" अज्वालीत् ॥ "पत्लृ- पत् गतौ" पतति । श्वि-असू-वच-पतोऽङि क्रमेण 'श्व-आस्थ-वोच पप्त' इत्यादेशाः । अपप्तत् ॥१॥

"षद्लृं- सद् विशरण-गत्यवसादनेषु" सीदति, असदत् ॥ "शद्लृं- शद् शातने" शदेः शिति कर्तर्यात्मनेपदं स्यात् ॥ शीयते, अशदत् ॥२॥

"टुवमू-वम् उद्गिरणे" वेमतुः, ववमतुः ॥ "भ्रमू- भ्रम् चलने" भ्राम्यति, भ्रमति, भ्रेमुः, बभ्रमुः ॥ "फल- फल् गतौ" फेलतुः ॥ "क्रुशं-क्रुश् आह्वान-रोदनयोः" अक्रुक्षत् ॥ "रुहं- रुह् जन्मनि" अरु-

क्षत्, रोढा ।। "रमिं–रम् क्रीडायाम्" रमते । व्याङ्-परेः परस्य रमः परस्मैपदं कर्तरि ॥ विरमति, व्यरंसीत् ।। "षहिं–सह् मर्षणे" सहते, सेहे, सोढा ॥३॥

॥ इति ज्वलादिः ॥६॥

## ७-अथ भ्वादिगतो यजादिः ॥

"यजीं– यज् देवपूजासंगतिकरणदानेषु" यजति, यजते, अयाक्षीत्, अयष्ट, इयाज । यजादि-वचेः, ज्या-व्यधश्च किति सस्वराऽन्तस्था य्वृत् स्यात् ॥ ईजतुः, ईजे ॥१॥

"व्येंग्– व्ये संवरणे" व्ययति, विव्याय, विव्यतुः, विव्ययिथ, विव्ये, वीयात्, व्याता ॥२॥

"ह्वेंग्– ह्वे स्पर्धा-शब्दयोः" ह्वयति । ह्वा-लिप्-सिचः कर्तर्यद्यतन्याम् 'अङ्' स्यात्, आत्मने तु वा ॥ अह्वत्, अह्वत, अह्वास्त, ह्वो द्वित्वविषये य्वृत् स्यात् ॥ जुहाव, जुहुवे, जुहोथ, जुहविथ ॥ "डुवपीं– वप् बीजसन्ताने" उवाप, ऊपे ॥ "वहीं– वह् प्रापणे" उवाह, ऊहे ॥ "ट्वोश्वि– श्वि गति-वृद्ध्योः" श्व-

यति, अश्वत्, अशिश्वयत्, अश्वयीत् । श्वेः परोक्षायङि वा य्वृत् ॥ शुशाव, शिश्वाय ॥ "वद- वद् व्यक्तायां वाचि" उवाद, ऊदतुः ॥३॥

॥ इति यजादिः ॥

## ॥ अथ भ्वादिगतो घटादिः ॥

"घटिष्- घट् चेष्टायाम्" घटते ॥ "फण- फण् गतौ" फेणतुः, पफणतुः ॥

इति घटादिः ॥

॥ इति भ्वादिगणः समाप्तः ॥७॥

## ८-अथाविकरणः कानुबन्धोऽदादिगणः ॥

### तत्र परस्मैपदम् ॥

"अदं- अद् प्सांक्- प्सा भक्षणे" अत्ति, अद्यात्, अत्तु । हु-धुटो र्हेधिः ॥ अद्धि । अद्-रुदपञ्चकात्, दि-स्योः शितोरादिः 'अट्-अ' स्यात् ॥ आदत् । अदेः 'सन्-अद्यतनी-घञ्-अच्-अल्' इति परे 'घस्लृ-घस्'

स्यात्, परोक्षायां तु वा ।। अघसत्, जघास, जघसिथ, आद, आदिथ ।।१।।

"यांक्– या प्रापणे" द्विष्-आतोऽवितः शितोऽन्तो वा 'पुस्-उस्' स्यात् ।। अप्सान्, अप्सुः, अयान्, अयुः ।। "पांक्– पा रक्षणे" पायात् ।। "मांक्–मा माने" मेयात् ।।२।।

"इंक्– इ स्मरणे" नित्यमधिपूर्वः । अध्येति । इकः स्वरादाववविति शिति यो वा स्यात् ।। अधियन्ति, अधीयन्ति । 'इण्-इक्-अस्' धातोरादेर्ह्यस्तन्यां वृद्धिः स्यात् ।। अध्यायन्, अध्यैयन् । इण्-इकोऽद्यतन्यां गाः स्यात् ।। अगात् ।।३।।

"इंण्क्- इ गतौ" एति । 'हु-इणः' स्वरादाववविति शिति क्रमेण 'व् य्' स्यात् ।। यन्ति, आयन्, अगात् ।।४।।

"तुंक्– वृत्ति-हिंसा-पूरणेषु । उदन्तधातोर्व्यञ्जनादौ विति औः, न द्वयुक्तस्य ।। तौति । ब्रूतो यङन्तात् तु-रु-स्तुभ्यश्च परो व्यञ्जनादौ विति 'ईत्' बहुलं

परादिः ॥ तवीति, तोता ॥ "रु शब्दे" रौति, रवीति, रविता ॥५॥

## ९–अन्तर्गणो रुदादिपञ्चकः ॥

"रुदृक्– रुद् अश्रुविमोचने" रुदादिपञ्चकात् परस्य अयशिद्व्यञ्जनादिप्रत्ययस्यादिरिट् स्यात्, दि-स्योस्तु 'ईट्-ई' स्यात् ॥ रोदिति, रुद्यात्, अरोदीत्, अरोदत्, अरोदीः, अरोदः, अरुदत् ॥१॥

"ञिष्वपंक्– स्वप् शये" स्वपिति । स्वपः किति यङि ङे च सस्वराऽन्तस्था य्वृत्, ज्या-व्यधस्तु ङिति ॥ सुषुपतुः, सुप्यात् ॥ "अन- अन् श्वसक्– श्वस् प्राणने" अनिति, श्वसिति ॥२॥

## १०–अन्तर्गणो जक्षादिपञ्चकः ॥

"जक्षक्– जक्ष् भक्ष-हसनयोः" अयं रुदादेः पञ्चमो जक्षादिपञ्चकस्याद्यः । जक्षिति, जक्षति ॥ द्व्युक्तजक्षपञ्चकात् शितोऽवितोऽनः पुस् स्यात् ॥ अजक्षुः ॥१॥

"दरिद्राक्– दरिद्रा दुर्गतौ" दरिद्राति । दरिद्रो

व्यञ्जनादौ शित्यविति आत इः स्यात् ॥ दरिद्रितः । 'द्वयुक्त-जक्षादिपञ्चक-श्ना' इत्यस्यातः शित्यविति लुक् ॥ दरिद्रति । 'सन्-णकच्-णकाऽनट्' वर्जेऽशिति दरिद्रो लुक् स्यात्, अद्यतन्यां तु वा ॥ अदरिद्रीत्, अदरिद्रासीत्, दरिद्रांचकार, ददरिद्रौ, दरिद्रयात् ॥२॥

"जागृक्– जागृ निद्राक्षये" अजागरुः, अजागरीत्, जजागार, जागरांचकार । जागुः किति गुणः ॥ जजागरतुः, जागर्यात् ॥३॥

"चकासृक्– चकास् दीप्तौ" चकासति, चका-धि, द्धि, अचकासुः ॥४॥

"शासूक्– शास् अनुशिष्टौ" शास्ति ॥ शास आस इस् स्यात्, अङि किति व्यञ्जनादौ च ॥ शिष्टः । ह्यन्तस्य– शासः शाधि, असः– एधि, हनः– जहि स्यात् ॥ शाधि ॥ व्यञ्जनान्तधातोः– देर्लुक् सश्च दः, सेर्लुक् स्-द्-धश्च लुक् स्यात् ॥ अशात्, अशाः, अशिषत् ॥५॥

॥ रुत्पञ्चकं जक्षपञ्चकं च समाप्तम् ॥

"वचंक्- वच् भाषणे" वक्ति, अवोचत्, उवाच, ऊचतुः ॥१॥

"मृजौक्- मृज् शुद्धौ" मृजोऽस्य वृद्धिः, ऋतस्तु स्वरे वा ॥ मार्ष्टि, मृजन्ति, मार्जन्ति, अमार्ट्, अमार्जीत्, अमार्क्षीत् ॥२॥

"विदक्-विद् ज्ञाने" वेत्ति । वेत्तेः परस्मैतिवादिपञ्चकस्य णवादिपञ्चकं वा ॥ वेद । वेत्तेः पञ्चम्याः किद् आम् वा, ततः पञ्चम्यन्तः कृगनु ॥ विदांकरोतु, वेत्तु, विदांचकार, विवेद ॥३॥

"हनंक्- हन् हिंसा-गत्योः" हन्ति, हतः, घ्नन्ति, जहि । हनो वधोऽद्यतन्याम्, आत्मने तु वा ॥ अवधीत् । हि-हनो ङवर्जप्रत्यये द्वित्वे परस्य हो घः स्यात् ॥ जघान जघ्नतुः । आशिषि हनो वधः, न तु ञिटि ॥ वध्यात्, हन्ता, हनिष्यति ॥४॥

"वशक्- वश् कान्तौ" वष्टि । वशः सस्वराऽन्तस्था किति य्वृत्, न तु यङि ॥ उष्टः, उवाश, ऊशतुः, उश्यात् ॥५॥

"असक्- अस् भुवि" अस्ति। श्नस्यास्तेश्चातः शित्यविति लुक् ॥ स्तः। अस्तेः सस्य सादौ प्रत्यये लुक्, एति तु हः ॥ असि, एधि, आसीत्, आसीः। अस्ति-ब्रुवोरशिति क्रमेण 'भू वच्' स्याताम् ॥ इत्यशिति भूवत् ॥६॥

यङ्लुक् च ॥७॥

॥ इत्यदादौ परस्मैपदम् ॥ ८-९-१० ॥

## ११-अथादादावात्मनेपदम् ॥

"इङ्क्- इ अध्ययने" नित्यमधिपूर्वः। अधीते, अधीयाते, अधीयते। इङोऽद्यतनीक्रियातिपत्त्योर्वा गीङ् स्यात् ॥ अध्यगीष्ट, अध्यैष्ट। इङः परोक्षायां गाः स्यात् ॥ अधिजगे, अध्यगीष्यत, अध्यैष्यत ॥१॥

"शीङ्क्- शी स्वप्ने" शीङ शिति एः ॥ शेते। शीङ आत्मनेपदस्थस्य 'अन्तो रत्' स्यात् ॥ शेरते, अशयिष्ट, शिश्ये ॥२॥

"आसिक्- आस् उपवेशने" आसांचक्रे ॥३॥

॥ इत्यात्मनेपदम् ॥११॥

# १२–अथादादावुभयपदम् ॥

"ष्टुंग्क्– स्तु स्तुतौ" स्तौति, स्तवीति ॥ धूग्-सु-स्तोः परस्मैसिच् आदिरिट् स्यात् ॥ अस्तावीत्, तुष्टोथ, तुष्टुव ॥१॥

"ब्रूंग्क्–ब्रू व्यक्तायां वाचि" ब्रूगस्तिवादिपञ्चकस्य क्रमेण णवादिपञ्चकं वा भवति ॥ आह, आहतुः, आहुः, धुट्-पदान्ते नहः– तः, आहश्च थः स्यात् ॥ आत्थ, आहथुः । ब्रवीति । अशिति वचादेशे वच्वत् ॥२॥

"द्विषींक्– द्विष् अप्रीतौ" द्वेष्टि, अद्विषुः, अद्विषन्, अद्विक्षत्, अद्विक्षत, सकोऽस्य स्वरे लुक् स्यात् ॥३॥ अद्विक्षताम् अद्विक्षन्त ॥३॥

"दुहींक्– दुह् क्षरणे" दोग्धि, धोक्षि, अधोक्, अधोग्, अधुक्षत । दुह्-दिह्-लिह्-गुहः सको दन्त्यात्मने वा लुक् स्यात् ॥ अदुग्ध, अधुक्षथाः, अदुग्धाः, अधुक्षावहि, अदुह्वहि ॥ एवं– "दिहींक्– दिह् लेपे" इत्यस्यापि ॥४॥

"लिहींक्– लिह् आस्वादने" लेढि, लीढः, अलिक्षत्, अलिक्षत, अलीढ ॥५॥

॥ इत्यदादावुभयपदम् ॥ ११–१२ ॥

## १३–अथादाद्यन्तर्गणो ह्वादिः ॥

## तत्र परस्मैपदम् ॥

"हुंक्– हु दानादनयोः" दानमत्र हविष्प्रक्षेपः । ह्वादिः शिति द्विः स्यात् ॥ जुहोति, जुह्वति, जुहुधि, अजुहवुः, जुहवांचकार, जुहाव ॥१॥

"ओहांक्– हा त्यागे" जहाति, हाको व्यञ्जनादौ शित्यविति आत इर्वा, हौ तु– आ इश्च वा, यि तु लुक् स्यात् ॥ जहितः, द्व्युक्त-जक्षपञ्चतः श्नश्चातः शित्यविति व्यञ्जनादौ ईः स्यात्, न दासंज्ञस्य ॥ जहीतः, जह्यात्, जहाहि, जहिहि जहीहि, जहेयात् ॥२॥

"ञिभींक्– भी भये" बिभेति, भियो व्यञ्जनादौ शित्यविति इर्वा स्यात् ॥ बिभितः, बिभीतः, बिभ्यति, बिभियांचकार, बिभाय ॥३॥

ह्रींक्- ह्री लज्जायाम्" जिह्रेति, जिह्रियति, जिह्रयांचकार, जिह्राय ॥४॥

"पृंक्- पृ पालन-पूरणयोः" पृ-भृ-मा-हाङः शिति द्वित्वे पूर्वस्य इः स्यात् ॥ पिपर्ति, पिपृतः, पिप्रति ॥५॥ "ॠंक्- ॠ गतौ" इयर्ति, इयृतः ॥

॥ इति परस्मैपदम् ॥ १३ ॥

## १४-अथात्मनेपदम् ॥

"ओहांङ्क्- हा गतौ" जिहीते ॥ "मांङ्क्- मा मान-शब्दयोः" मिमीते ॥ इत्यात्मनेपदम् ॥ १४ ॥

## १५-अथोभयपदम् ॥

"डुदांग्क्- दा दाने" ददाति, दत्ते, देहि, अदात्, स्थो दासंज्ञकाच्चात्मनेपदविषयः सिच् किद्वत् स्यात्, तद्योगे च स्था-दोरिश्च ॥ अदित, अदिषताम्, अदिथाः ॥१॥

"डुधांग्क्- धा धारणे पोषणे च" दधाति । चतुर्थान्तस्य धागो दादेरादेर्दस्य त-थ-स-ध्वेषु धः स्यात् ॥ धत्तः, धत्थः, धत्स्व, धद्ध्वम् ॥२॥

"डुभृंग्क्– भृ पोषणे धारणे च" बिभर्ति, बिभरां-चकार, बभार, बभृव ॥३॥

"णिजं्की- निज् शौचे पोषणे च" निज्-विज्-विषां शिति द्वित्वे पूर्वस्य एत् स्यात् ॥ नेनेक्ति, नेनिक्तः, द्व्युक्तोपान्त्यस्य शिति स्वरे गुणो न ॥ नेनिजानि, एवं– "विजं्की-विज् पृथग्भावे" इत्यस्यापि ॥४॥

"विष्लृंकी– विष् व्याप्तौ" वेवेष्टि, वेविषाणि, अविषत्, अविक्षत ॥५॥

॥ इत्युभयपदम् ॥ इति ह्वादिः ॥ १३–१५ ॥

॥ इति अदादिगणः समाप्तः ॥ ८–१५ ॥

## १६–अथ चानुबन्धो दिवादिः ॥

"दिवूच्– दिव् क्रीडादौ" दिवादेः कर्तरि शिति 'श्यः-य' ॥ दीव्यति, अदेवीत्, दिदेव ॥१॥

"जॄष्च्– जॄ जरसि" जीर्यति, अजरत्, अजारीत्, जजार, जेरतुः, जजरतुः, जरीता, जरिता ॥२॥

"शोंच्– शो तक्षणे" ओतः श्ये लुक् ॥ श्यति, अशात्, अशासीत् ॥ "दों छोंच्– दो छो छेदने" द्यति,

अदात्, देयात्, छ्यति, अच्छात्, अच्छासीत् ॥ "षोंच्-सो अन्तकर्मणि" स्यति, असात्, असासीत्, सेयात् ॥३॥

"नृतैच्- नृत् नर्तने" नृत्यति, नर्तिष्यति, नर्त्स्यंति ॥४॥

"व्यधंच्- व्यध् ताडने" विध्यति, अव्यात्सीत्, अव्याद्धाम्, विव्याध, विविधतुः, विध्यात् ॥ "त्रसैच्- त्रस् भये" त्रस्यति, त्रसति, तत्रसतुः, त्रेसतुः ॥५॥

## १७-अथ दिवाद्यन्तर्गणः पुषादिः परस्मैपद्येव ॥

"पुषंच्- पुष् पुष्टौ" अपुषत् ॥१॥

"ञिमिदाच्- मिद् स्नेहने" मिद उपान्त्यस्य श्ये गुणः ॥ मेद्यति, अमिदत् ॥२॥

"तृपौच्- तृप् प्रीतौ" अतृपत्, अतर्पीत्, अत्राप्सीत्, तर्पिता, तर्प्ता, त्रप्ता ॥ एवं "दृपौच्- दृप् हर्ष-मोहनयोः" इत्यस्यापि ॥३॥

"नशौच्—नश् अदर्शने" नशोऽङि नेश् वा स्यात् ॥ अनेशत्, अनशत्, नशः स्वरात् परो धुडादौ नोऽन्तः स्यात् ॥ नंष्टा, नशिता ॥४॥

"असूच्—क्षेपणे" आस्थत् ॥ "यसूच्—यस् प्रयत्ने" यस्यति, यसति ॥५॥

## १८—अथ शमादिसप्तकम् ॥

"शमू दमूच्— शम् दम् उपशमे" शमादीनां सप्तानां श्ये दीर्घः ॥ शाम्यति, अशमत्, दाम्यति अदमत् ॥ "तमूच्— तम् काङ्क्षायाम्" ताम्यति, अतमत् ॥ "श्रमूच्— श्रम् खेद-तपसोः" श्राम्यति ॥ "भ्रमूच्— भ्रम् अनवस्थाने" भ्राम्यति, भ्रमति ॥ "क्षमौच्— क्षम् सहने" क्षाम्यति, अक्षमत्, क्षमिता, क्षन्ता ॥ "मदैच्— मद् हर्षे" माद्यति ॥ इति शम्-सप्तकं समाप्तम् ॥

क्लमौच्— क्लम् ग्लानौ" क्लाम्यति, क्लामति ॥

॥ इति पुषादिः समाप्तः ॥ १८ ॥

## १९–अथात्मनेपदम् ॥

"बुधिच्–बुध् ज्ञाने" अबोधि, अबुद्ध ॥ "जनैचि-जन् प्रादुर्भावे" ज्ञा-जनोः शिति जाः स्यात्, न त्वनन्तरे तिवादौ ॥ जायते, अजनि, अजनिष्ट, जज्ञे ॥ "दीपैचि-दीप् दीप्तौ" अदीपि, अदीपिष्ट॥ "पूरैचि-पूर् आप्यायने" अपूरि, अपूरिष्ट ॥ इत्यात्मनेपदम् ॥

## २०–अथोभयपदम् ॥

"मृषीच्-मृष् तितिक्षायाम्" मृष्यते, मृष्यति ॥१॥ "णहींच्– नह् बन्धने" अनात्सीत्, अनाद्धाम्, अनद्ध, अनत्साताम् ॥२॥

॥ इत्युभयपदम् ॥ २० ॥

॥ इति दिवादिगणः समाप्तः ॥ १७-२० ॥

## २१–अथ टानुबन्धः स्वादिगणः ॥

## तत्रोभयपदम् ॥

"षुंग्ट्–सु अभिषवे" स्वादेः कर्तरि शिति 'श्नुः–नु' स्यात् ॥ सुनोति, सुनुते, सुन्वन्ति । असंयोगात्

परस्य प्रत्ययस्य उतो वा लुक्, अविति व-मादि-प्रत्यये ॥ सुनुवः सुन्वः, सुनुमः सुन्मः, सुनु, सुनुतात्, असावीत्, असोष्ट ॥१॥

"चिग्ट्- चि चयने" चिचाय, चिकाय, चिच्यतुः॥ "धूग्ट्- धू कम्पने" अधावीत्, अधोष्ट, अधविष्ट, धविता, धोता ॥ "वृग्ट्- वृ वरणे" अवारीत् । वृ-ॠदन्तधातोरात्मनेसिजाशिषोरिट् वा ॥ अवृत, अवरिष्ट, अवरीष्ट, ववरिथ, ववृव, व्रियात्, वरिषीष्ट, वरिता, वरीता ॥२॥ इत्युभयपदम् ॥

## अथ परस्मपदम् ॥

"हिंट्- हि गति-वृद्धयोः" जिघाय ॥ "श्रुंट्- श्रु श्रवणे" शृणोति, शुश्रोथ, शुश्रुव ॥ "आप्लृंट्-आप् व्याप्तौ" आप्नुवः, आप्नुहि, आपत् ॥ "कृवुट्-कृण्व् हिंसा-करणयोः" कृणोति, चकृण्व ॥ "धिवुट्-धिन्व् गतौ" धिनोति, दिधिन्व ॥३॥ इति परस्मैपदम् ॥

## अथात्मनेपदम् ॥

"अशौटि-अश् व्याप्तौ" अश्नुते, अश्नुवाते, आ-

शिष्ट, आशष्ट, आनशे, आनशिषे, आनक्षे ॥ इत्यात्मनेपदम् ॥४॥

| ॥ इति स्वादिः समाप्तः ॥ २१ ॥ |
|---|

## २२–अथ तानुबन्धस्तुदादिः ॥
## तत्रोभयपदम् ॥

"तुदींत्–तुद् व्यथने" तुदादेः कर्तरि शिति 'शः-अ' ॥ तुदति, तुदते, अतौत्सीत्, अतुत्त ॥१॥

"भ्रस्जींत्– भ्रस्ज् पाके" सस्य जयोगे शे तस्य तृतीये 'भ्रज्ज्' इति, ग्रह्-व्रस्च-भ्रस्ज-प्रच्छः क्ङिति सस्वरान्तस्था य्वृत् ॥ भृज्जति ४ । अशिति भृज्जो वा भर्जः ॥ अभार्क्षीत्, अभ्राक्षीत्, बभर्ज, बभर्जतुः, बभर्जिथ, षत्वे बभर्ष्ठ । पक्षे– बभ्रज्ज, बभ्रज्जतुः, भृज्यात्, भ्रज्यात् ॥२॥

"मुच्लृंती– मुच् मोक्षणे" मुचादि-तृफ-दृफ-गुफ-शुभोमः शे परे स्वरात् परो नोऽन्तः ॥ मुञ्चति ४, अमुचत्, अमुक्त ॥ "षिचींत्–सिच् क्षरणे" सिञ्चति, ह्वा-लिप्-सिचः कर्तर्यद्यतन्यामङ्, आत्मने तु

वा ।। असिचत्, असिचत, असिक्त ।। "लिपींत्—लिप् उपदेहे" लिम्पति, अलिपत्, अलिपत, अलिप्त ।।३।।

।। इत्युभयपदम् ।।

।। अथ परस्मैपदम् ।।

"कृतैत्— कृत् छेदने" कृतन्ति, कर्त्स्यंति, कर्तिष्यति ।। "मृंत्— मृ प्राणत्यागे" अस्य शिति अद्यतन्यामाशिषि चात्मनेपदम्, अन्यत्र तु परस्मैपदम् ।। म्रियते ४ । अमृत, मृषीष्ट, ममार ।।१।।

"कृत्— कृ विक्षेपे" किरति, अकारीत्, अकारिष्टाम्, चकार, चकरतुः, कीर्यात्, करीता करिता ।। "गृत्— गृ निगरणे" अस्य रस्य स्वरे लो वा ।। गिलति, गिरति ।।२।।

"ओव्रस्चौत्— व्रस्च् छेदने" वृश्चति, वव्रश्च, वव्रश्चतुः, व्रष्टा, व्रश्चिता ।। "ऋछत्— ऋच्छ इन्द्रियप्रलय-मूर्तिभावयोः" ऋच्छति, आनर्च्छ, आनर्च्छुः ।।३।।

"विछत्— विच्छ गतौ" विच्छायति, विच्छति, विच्छिता, विच्छायिता ।। " प्रछंत्— प्रच्छ ज्ञीप्सा-

याम्'' पृच्छति, अप्राक्षीत्, पप्रच्छतुः ॥ "सृजंत्-सृज् विसर्गे" सृजति, अस्राक्षीत्, ससर्जिथ, सस्रष्ठ, स्रष्टा ॥ "टुमस्जोंत्- मस्ज् शुद्धौ" मज्जति, धुटि मस्जेः सस्य नः ॥ अमाङ्क्षीत्, ममज्जिथ, ममङ्क्थ, मङ्क्ता ॥ "चृतैंत्- चृत् हिंसा-ग्रन्थयोः" चर्त्स्यति, चर्तिष्यति ॥४॥

"तृफत्- तृफ् तृप्तौ" तृम्फति ॥ "दृफत्- दृफ् उत्क्लेशे" दृम्फति ॥ "गुफत्-गुफ् ग्रन्थने" गुम्फति ॥ "उभत्- उभ् पूरणे" उम्भति, उवोभ ॥ "शुभत्-शुभ् शोभार्थे" शुम्भति ॥५॥

"स्पृशंत्- स्पृश् स्पर्शे" स्पृशति, अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्, स्प्रष्टा, स्पर्ष्टा ॥ एवं- "मृशंत्- मृश् आमर्शने" ॥ "इषत्- इष् इच्छायाम्" इच्छति, एषिता एष्टा ॥६॥

## अथान्तर्गणः कुटादिः ॥

"कुटत्-कुट् कौटिल्ये" कुटादेः परो 'ञिद्-णिद्-'वर्जः प्रत्ययो ङिद्वत् स्यात् ॥ कुटति, अकुटीत्, चु-

कोट, चुकुट, कुटिता ।। "व्यचत्- व्यच् व्याजीकरणे" अस्य 'अस्'वर्जे ङिति सस्वराऽन्तस्था य्वृत् ।। विचति, विच्यात्, विविचतुः, विचिता ।। "छुरत्- छुर् छेदने" छुरति, अच्छुरीत्, चुच्छोर, छुर्यात् ।।७।। ।। इति कुटादिः ।।

।। अथात्मनेपदम् ।।

"पृंङत्- पृ व्यायामे" व्याप्रियते, व्यापप्रे, व्यापरिष्यते ।। एवं- दृंङत्- दृ आदरे" आद्रियते ।।

।। इत्यात्मनेपदम् ।।८।।

।। इति तुदादिः समाप्तः ।।२२।।

## २३-अथ पानुबन्धो रुधादिः ।।

## तत्रोभयपदम् ।।

"रुधृंपी- रुध् आवरणे" रुधादीनां स्वरात् परः कर्तरि शिति 'श्नः- न' स्यात्, तद्योगे प्रकृतेर्नलुक् च ।। रुणद्धि, रुन्द्ध, रुन्धन्ति, अरुणत्, अरुणः, अरुधत्, अरौत्सीत्, अरुद्ध ।।" ऊछृदृपी- छृद् दीप्तिदेवनयोः" छर्त्स्यति छर्दिष्यति ।। एवम्- "ऊतृदृ-

पी- तृद् हिंसाऽनादरयो:'' ॥ इत्युभयपदम् ॥

अथ परस्मैपदम् ॥

"भञ्जोंप्- भञ्ज् आमर्दने'' भनक्ति, अभाङ्क्षीत्, बभञ्ज ॥ "पिष्लृंप्-पिष् संचूर्णने'' पिनष्टि, पिष्टः ॥ "हिसु- हिन्स् तृहप्- तृह् हिंसायाम्'' हिनस्ति, अहिनत्, अहिनः, अहिनत् । तृहः श्नात् 'ईत्-ई' विति व्यञ्जने ॥ तृणेढि, तृण्ढः तृं हन्ति ॥ इति परस्मैपदम् ॥

अथात्मनेपदम् ॥

"ञिइन्धैंपि-इन्ध् दीप्तौ'' इन्द्धे, इन्धे, इन्धाञ्चक्रे, समिन्धांचक्रे, समीधे ॥ इति आत्मनेपदम् ॥

॥ इति रुधादिः समाप्तः ॥२३॥

## २४-अथ यानुबन्धस्तनादिः ॥

### तत्रोभयपदम् ॥

"तनूयी- तन् विस्तारे'' तनोति, तनुवः, तन्वः, अतानीत्, अतनीत्, ततान, तेनतुः, तनादेः परस्य सिचस्ते थासि च लुक् वा, तद्योगे न-णयोश्च लुप् न चेद्, सनो लुपि सत्याम् 'आ वा' स्यात् ॥ अतत,

अतनिष्ट, अतथाः, अतनिष्ठाः ।। "षणूयी–षण् दाने" असात, असत, असनिष्ट ।। इत्युभयपदम् ।।

अथात्मनेपदम् ।।

"वनूयी– वन् याचने" वनुते, ववने ।। "मनूयि– मन् बोधने" मनुते, मेने ।। इत्यात्मनेपदम् ।।

।। इति तनादिगणः समाप्तः ।।२४।।

## २५–अथ शानुबन्धः क्र्यादिगणः ।।

### तत्रोभयपदम् ।।

"डुक्रींग्श्–क्री द्रव्यविनिमये" क्र्यादेः कर्तरि शिति 'श्ना–ना' स्यात् ।।१।।

क्रीणाति, क्रीणीतः, क्रीणन्ति ।। "ग्रहीश्– ग्रह् उपादाने" गृह्णाति, व्यञ्जनात् श्नाहेः 'आनः' ।। गृहाण, अग्रहीत्, ग्रह इटोऽपरोक्षायां दीर्घः ।। अग्रहीष्टाम् ।।२।।

अथान्तर्गणः प्वादिः ।।

"पूग्श्–पू पवने" प्वादेः शिति ह्रस्वः ।। पुनाति ।।

## अथ प्वाद्यन्तर्गणो ल्वादिः ॥

"लूग्श्–लू छेदने" लुनाति ॥ "स्तॄग्श्–स्तॄ आच्छादने" स्तृणाति, अस्तारीत्, अस्तरिष्ट, अस्तीर्ष्ट, तस्तार, स्तीर्यात्, स्तरिषीष्ट ॥ "वॄग्श्–वॄ वरणे" वृणाति, वूर्यात्, वरिषीष्ट, वूर्षीष्ट ॥ "ज्यांश्–ज्या हानौ" वेग्वर्जस्य अन्त्यं य्वृद् दीर्घं स्यात् ॥ इति दीर्घेऽपि प्वादित्वाद् ह्रस्वे– जिनाति, अज्यासीत्, जिज्यौ, जीयात्, ज्याता ॥ इति प्वादिर्ल्वादिश्च समाप्तः ॥

"ज्ञांश्–ज्ञा अवबोधने" जानाति, अज्ञासीत्, जज्ञे, ज्ञाता ॥ "अशश्–अश् भोजने" अश्नाति, अशान, आश, अशिता ॥ "मुषश्– मुष् स्तेये" मुष्णाति, मुषाण, एवं– "पुषश्– पुष् पुष्टौ" ॥३॥

॥ इति क्र्यादिगणः समाप्तः ॥२५॥

## २६–अथ चुरादिगणः ॥

"चुरण्– चुर् स्तेये" चुरादिभ्यः स्वार्थे 'णिच्-इ' भवति ॥ चोरयति, अचूचुरत्, चोरयांचकार

बभूव, चोरयामास, चोर्यात् ॥ "कथण्– कथ वाक्यप्रबन्धे" कथयति, अचकथत् ॥ "गणण्– गण संख्याने" गणयति, गणस्य ङपरे णौ द्वित्वे पूर्वस्य ईः, अश्च स्यात् ॥ अजीगणत्, अजगणत् ॥

॥ इति चुरादिः समाप्तः ॥२६॥

## २७–अथ णिगन्तप्रक्रिया ॥

कर्तुः प्रेरकः–प्रयोक्ता, तद्व्यापारे 'णिग्-इ' स्यात् ॥ कश्चिद् भवति तमन्यः प्रयुङ्क्ते– प्रेरयतीति वाक्ये, भवन्तं प्रयुङ्क्ते इति वाक्ये वा-णिगि– भावयति, भावयते, द्वित्वे पूर्वस्योतोऽवर्णान्ते जान्तस्थापवर्गे परे सनि इः स्यात् ॥ अबीभवत्, एवं वाक्यद्वयमन्यत्रापि ॥१॥

'ऋ-री-ब्ली-ह्री-क्नूय्-क्ष्माय्-आदन्त' इत्येषां णौ पुः स्यात् ॥ स्था, तिष्ठन्तं प्र०– स्थापयति, स्थो ङपरे णौ उपान्त्यस्य इः स्यात् ॥ अतिष्ठिपत् ॥ ऋ, ऋच्छन्तं प्र०– अर्पयति, स्वरादिधातोर्द्वितीय एकस्वरोंऽशो द्विः स्यात्, तत्र संयोगस्याद्या ब-द-ना न

द्विः, एवं संयोगादिभूतो रो न द्विः, न चेत् परो यः ॥ आर्पिपत् ॥ क्ली, क्लिनन्तं– क्लेपयति । "क्नूयैङ्– क्नूय् शब्दोन्दनयोः" णौ यवर्जव्यञ्जनादौ च य्वोर्लुक् स्यात् ॥ क्नूयमानं– क्नोपयति ॥ "क्ष्मायैङ्– क्ष्माय् विधूनने" क्ष्मायमानं–क्ष्मापयति ॥ ह्री, जिह्रियतं– ह्रेपयति ॥ णौ 'क्री-जि-इङ्' इत्येषामन्तस्य आ स्यात् ॥ क्रीणन्तं जयन्तम् अधीयानं– क्रापयति, जापयति, अध्यापयति, अध्यापिपत् ॥२॥

'पा-छा-सा-वे-ह्वा' इत्येषां णौ योऽन्तः स्यात् ॥ पिबन्तं श्यन्तं छ्यन्तं स्यन्तं, [ "वेंग्– वे तन्तुसन्ताने" ] वयन्तं ह्वयन्तं प्रयुङ्क्ते– पाययति, शाययति, छाययति, साययति, वाययति, ह्वाययति । ण्यन्तस्य पिबो पिप्य् स्यात्, न च द्विः ॥ अपिप्यत् ॥ घटादीनां णौ ह्रस्वः, ञि-णम्परे णौ तु वा ॥ "घटिष्–घट् चेष्टायाम्" घटमानं प्रयुङ्क्ते–घटयति, अजीघटत् ॥ हनो ञ्णिति घात् स्यात् ॥ घ्नन्तं प्र० घातयति ॥३॥

इति ण्यन्तप्रक्रिया ॥२७॥

## २८-अथ सन्नन्तप्रक्रिया ॥

यो धातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हः, तस्मादिच्छायां सन् वा स्यात्, न तु इच्छासन्नन्तात् ॥ सन्नन्तस्य यङन्तस्य चाद्य एकस्वरोंऽशो द्विः ॥ द्वित्वे पूर्वस्यातः सनि इः स्यात् ॥ पठितुमिच्छतीति- पिपठिषति ॥१॥

नाम्यन्तात् नाम्युपान्तायश्च धातोरनिट् सन् किद्वत् ॥ भेत्तुमिच्छतीति- बिभित्सति, 'स्वरान्त-हन्-गमु' धातोर्धुडादौ सनि दीर्घः स्यात् ॥ जेतुमिच्छतीति- जिगीषति । 'उवर्णान्त-ग्रह-गुह' धातोः सन आदिरिट् न ॥ "रुक्- रु शब्दे" रवितुं भवितुं चेच्छतीति- रुरूषति, बुभूषति । कर्तुमिच्छतीति- चिकीर्षति । हन्तुमिच्छतीति- जिघांसति । इङ् इणिकोश्चाज्ञानार्थयोः सनि गमुः स्यात् ॥ सम्पूर्वस्य गम आत्मनेपदं स्यात् ॥ समेतुमिच्छतीति- संजिगांसते ॥२॥

उकारोपान्त्यव्यञ्जनादिधातोः परः क्त्वा सन् वा

किद्वत् स्यात्, रुद्-विद्-मुष्-ग्रह्-स्वप-प्रच्छस्तु नित्यम् ॥ ग्रहीतुं गूहितुं [ "गुहौग्- गुह् संवरणे" ] वेच्छतीति-जिघृक्षति, जुघुक्षति । रोदितुं मोषितुं स्वप्तुं वेच्छतीति–रुरुदिषति विविदिषति मुमुषिषति लेखितुं द्योतितुं वा इच्छतीति–लिलिखिषति, लिलेखिषति, दिद्युतिषते, दिद्योतिषते ॥३॥

ऋ-स्मि-पूङ्-अञ्ज्-अशौ-कृ-गृ-दृ-धृ-प्रच्छः सन आदिरिट् स्यात् ॥ प्रष्टुमिच्छतीति–पिपृच्छिषति । अर्तुं [ "ष्मिङ्- स्मि ईषद्धसने" ] स्मेतुं पवितुमङ्क्तुम् [ "अशौटि- अश् व्याप्तौ" ] अशितुं करीतुं गरीतुं [ "दृङ्त्- दृ आदरे" "धृंत्- धृ स्थाने" ] दर्तुं धर्तुं वेच्छतीति–अरिरिषति, सिस्मयिषते, [ णिस्तोरेवेति नियमात् षत्वाभावः ] पिपविषते, अञ्जिजिषति, अशिशिषते, चिकरीषति, जिगरीषति, दिदरिषते, दिधरिषते ॥४॥

'मि-मी-मा-दासंज्ञक' धातुस्वरस्य सि सनि इद् स्यात् ॥ 'रभ्-लभ्-शक्-पत्-पद्' धातुस्वरस्य तु सि

सनि तु इ स्यात्, न च द्विः ।। "डुमिंगट्–मि प्रक्षेपणे" "मींगश्– मी हिंसायाम्" "मांक्– मा माने" "मांङ्क्-मा मानशब्दयोः" मातुं दातुं धातुं वा इच्छतीति-मित्सति, मित्सते, मित्सति, दित्सति, धित्सति । "रभिं– रभ् कार्योपक्रमे" "डुलभिष्– लभ् प्राप्तौ" "पदिच्–पद् गतौ" । आरब्धुं लब्धुं शक्तुं पतितुं पत्तुं वा इच्छतीति– आरिप्सते, लिप्सते, शिक्षति, पित्सति, पित्सते ।।५।।

'इवन्त-ऋध्-भ्रस्ज्-दम्भ्-श्रि-यु-ऊर्णु-भर-ज्ञपि-सन्-तन्-पत्-वृ-ऋदन्त-दरिद्रा' इति धातोः परस्य सन आदिरिट् वा ।। इच्छतीति सर्वत्र योजनीयम् ।। देवितुं– दुद्युषति, दिदेविषति । "ऋधूच्–ऋध् वृद्धौ" ऋधः सि सनि ईर्तं स्यात्, न च द्विः ।। अर्धितुम्– ईर्त्सति, अर्दिधिषति । भ्रष्टुं-बिभर्क्षति, बिभर्जिषति । "दम्भूट्-दम्भ् दम्भे" दम्भः सि सनि 'धिप्-धीप्', न च द्विः ।। दम्भितुं-धिप्सति, धीप्सति, दिदम्भिषति । श्रयितुं- शिश्रीषति, शिश्रयिषति । "युक्-

यु मिश्रणे" यवितुं-युयूषति, यियविषति । "ऊर्णु-ग्क्-ऊर्णु आच्छादने" ऊर्णवितुम्-ऊर्णुनूषति, ऊर्णुनविषति । भर्तुं- बुभूर्षति, बिभरिषति । "ज्ञपि मारण-तोषण-निशाने" सि सनि ज्ञपेर्ज्ञीप्, आप ई-प्, द्विर्न ।। ज्ञपयितुम् आप्तुं- ज्ञीप्सति, जिज्ञपयिषति, ईप्सति । सनः सि सनि आः स्यात् ।। सनितुं-सिषासति, सिषनिषति । तनितुं- तितंसति, तितनिषति । पतितुं-पित्सति, पिपतिषति । वरितुं-वुवूर्षति, विवरिषति । तरितुं-तितीर्षति, तितरीषति । दरिद्रितुं- दिदरिद्रासति, दिदरिद्रिषति ।।६।।

।। इति सन्नन्तप्रक्रिया ।।२८।।

## २९-अथ यङन्तप्रक्रिया ।।

'अट्-ॠ-सूत्र-मूत्र-सूच-अश्-ऊर्णु' इति धातोः, व्यञ्जनादेरेकस्वराच्च धातोः- भृश आभीक्ष्ण्ये च यङ् वा स्यात्, गत्यर्थाद् व्यञ्जनादेरेकस्वरात् कुटिले, गॄ-लुप्-सद्-चर्-जप्-जभ्-दंश्-दह्' इत्यतश्च गर्ह्ये यङ् स्यात्; गॄणा-शुभ्-रुचस्तु न ।।१।।

यङन्तस्य द्वित्वे पूर्वस्य-न्याद्यागमवर्जस्य आ-गुणौ स्याताम्, वञ्च्-स्रंस्-ध्वंस्-कस्-पत्-पद्-स्कन्द्' इ-त्यस्य तु नी, आत् परो योऽनुनासिकस्तदन्तस्य 'जप्-जभ्-दह्-दश्-भञ्-चर्-फल्' इत्यस्य च 'मु-म्' क्रमतश्च 'री' अन्तः स्यात् ॥२॥

"अट-अट् गतौ" "सूत्रण्-सूत्र ग्रन्थने" "मूत्रण्-मूत्र प्रस्रवणे" "सूच- ण्-सूच पैशून्ये" ॥३॥

भृशं पुनः पुनर्वा-अटति ऋच्छति सूत्रयति मूत्र-यति सूचयति अश्नोति ऊर्णोति- अटाट्यते, अरा-र्यते, सोसूत्र्यते, मोमूत्र्यते, सोसूच्यते, अशाश्यते, ऊर्णोनूयते । व्यञ्जनान्तधातोः परस्य यकारस्या-शिति लुक् स्यात् ॥ आटाटिष्ट, अटाटांचकार, आरारिष्ट, आरारांचकार, असोसूत्रिष्ट, और्णोनू-यिष्ट ॥ कुटिलं याति- यायायते, अयायायिष्ट ॥४॥

"लुप्लृंती- लुप् छेदने" "जप् व्यक्ते वचने जापे च" "जभं-जभ् मैथुने" "दशं-दंश् दशने" "दहं-दह् भस्मीकरणे" ॥५॥

यङि गिरते रो लः ।। यङन्तयोः 'चर् फल्' इत्येतयोः, तावौ प्रत्यये चोपान्त्यस्यात उः स्यात्, न च तस्यौत् ।। गर्ह्यं-गिलति लुम्पति सीदति चरति जपति जम्भति दशति दहति- जेगिल्यते, लोलुप्यते, चंचूर्यते, जंजभ्यते, दंदश्यते, दंदह्यते ।। भृ० फलति- पंफुल्यते ।।६।।

"वञ्चू- वञ्च् गतौ" "भ्रंशूङ्- भ्रंश् स्रंसूङ्- स्रंस् अवंस्रसने" "ध्वंसूङ्-ध्वंस् अवस्रंसन-गत्योः" "कस-कस् गतौ" "पदिच्- पद् गतौ" "स्कन्दृ- स्कन्द् गति-शोषणयोः" ।।७।।

कुटिलं- वञ्चति कसति पतति पद्यते स्कन्दति- वनीवच्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते । भृशं पुनः पुनर्वा-स्रंसते ध्वंसते भ्रंशते इति-सनीस्रस्यते, दनीध्वस्यते, बनीभ्रश्यते, "भञ्जोप्-भञ्ज् आमर्दने" "पश् सौत्रो बन्धने" भृ० भनक्ति पशति- बंभज्यते, पंपश्यते ।।८।।

भृशं पुनः पुनर्वा पृच्छति नृत्यति-परिपृच्छ्यते ।

नरीनृत्यति । यङि नृतेर्नस्य णो न ॥ भृशं-पठति भवति-पापठ्यते, बोभूयते ॥९॥

च्वि-यङ्-य-वये ऋतो रीः ॥ भृ० करोति-चेक्रीयते ॥ घ्रा-ध्मोर्यङि ईः ॥ भृ० जिघ्रति धमतीति- जेघ्रीयते, देध्मीयते ॥ गा-पा-स्था-सा-दा-मा-हाकः किति यङ्वर्जेऽशिति व्यञ्जनादौ ईः ॥ भृशं पुनः पुनर्वा-गायति पिबति तिष्ठति स्यति ददाति माति जहातीति-जेगीयते, पेपीयते, तेष्ठीयते, सेसीयते, देदीयते, मेमीयते, जेहीयते ॥१०॥ इति यङन्तप्रक्रिया ॥२९॥

## ३०-अथ यङ्लुबन्तप्रक्रिया ॥

यङो बहुलं लुप् ॥ बोभवीति, बोभोति, बोभूतः, बोभुवति, अबोभवीत्, अबोभोत्, अबोभूताम्, अबोभवुः, बोभुवामास ॥१॥

ऋमतो यङो लुपि द्वित्वे पूर्वस्य 'रि-र्' अन्तः स्यात् ॥ चरिकर्ति, चर्कर्ति, चरीकर्ति, चरिकरीति, चर्करीति, चरीकरीति; चर्कृतः, चरिकृतः, चरीकृतः, चर्क्रति ३, चर्क्रियात् ३, अचर्करीत् ३, अचर्कः ३, अच-

तन्याम्– अचर्करीत् ३, चर्कराञ्चकार ३, चर्क्रि-
यात् ३, चर्करिता ३ ॥२॥
भृशं पुनः पुनर्वा वर्तते–वरिवृतीति, वरीवृतीति २,
रे बाहुलकान्नेत् वर्वर्ति ३, अवर्वृतीत् २, अवर्वृतत् ३,
अवर्वाः ३, अववर्तीत् ३, वर्तयामास ३, वर्वर्तिता
॥३॥ | इति यङ्लुबन्तप्रक्रिया ॥३०॥ |

## ३१–अथ नामधातुप्रक्रिया ॥

द्वितीयान्तादिच्छायां काम्यो वा ॥ इदमिच्छतीति–
इदंकाम्यति, ऐदंकाम्यत्, ऐदंकाम्यीत्, इदंकाम्यां-
चकार ॥१॥

मान्ताऽव्ययवर्जाद् द्वितीयान्ताद् इच्छायां 'क्यन्-
य' काम्यश्च वा ॥ क्यनि अवर्णस्य ईः ॥ पुत्रमिच्छती-
ति– पुत्रीयति, पुत्रकाम्यति, अपुत्रीयीत्, अपुत्रका-
म्यीत् ॥२॥

अमाव्ययाद् द्वितीयान्तादुपमानात् सप्तम्यन्तादा-
धाराच्च आचारेऽर्थे 'क्यन्– य' वा ॥ पुत्रमिवाच-
रति-मन्यत इति– पुत्रीयति छात्रम्, प्रासादे इवा-

चरति– व्यवहरतीति– प्रासादीयति कुट्याम्, प्रासादीयत् ॥३॥

कर्तुरुपमानादाचारे 'क्यङ्-य' वा ॥ हंस इवाचरति-हंसायते ॥ सान्तात् कर्तुरुपमानादाचारे क्यङ् वा स्यात्, अन्तस्य च सो वा लुक्, 'ओजस्-अप्सरस्' इत्यस्य तु नित्यं लुक् ॥ पय इवाचरति-पयायते, पयस्यते, ओजायते, अप्सरायते ॥४॥

मालां निधिं पटुं पितरं रायं गां नावं चेच्छतीति क्यनि– मालीयति, निधीयति, पटूयति, पित्रीयति, रैयति, गव्यति, नाव्यति । क्यवर्जे यादौ प्रत्यये ओतः-अव्, औतश्च-आव् ॥ समीधमिच्छतीति-समिध्यति । धातोर्व्यञ्जनात् परस्य क्योऽशिति प्रत्यये लुग् वा ॥ असमिधीत्, असमिध्यीत् । मैथुनार्थाद् 'वृष-अश्व' इत्यतः क्यनि 'स्सः-स्' अन्तः स्यात् ॥ मैथुनाय वृषमश्वं चेच्छतीति– वृषस्यति गौः, अश्वस्यति वडवा ॥५॥

कृगादीनां धातुनामर्थे नाम्नो 'णिच्–इ' बहुलं

स्यात् ।। 'णि-इष्ठ-ईयसु' इति इमनि च परतः 'तृ-अन्त्यस्वरादि' इत्येतयोर्लुक् स्यात् ।। कर्तारमाचष्टे-करयति ।। पृथ्वादेर्ऋतो रो ण्यादौ ।। पृथुं करोति आचष्टे वा- प्रथयति, अपप्रथत् । ऊढमूंढि वा करोत्याचष्टे वा- ऊढयति, औजढत्, औजीढत् ।।६।।

।। इति नामधातुप्रक्रिया ।।३१।।

## ३२-अथात्मनेपद-परस्मैपदप्रक्रिया ।।

कर्तर्यात्मनेपदं भवतीति सर्वत्र योज्यम् । निविशः-निविशते ।। परावेर्जेः- विजयते ।। परिव्यवात् क्रियः- परिक्रीणीते ।। भुनजोऽत्राणे-घृतं भुङ्क्ते, महीं भुनक्ति ।। क्रियाव्यतिहारे- व्यतिलुनीते, अन्याहं लवनं करोतीत्यर्थः, व्यतिहरन्ते भारम्; गत्याद्यर्थे न-व्यतिगच्छन्ति ।।१।।

कर्तरि परस्मैपदं भवतीति सर्वत्र योज्यम् । परानोः- कृगः- पराकरोति, अनुकरोति ।। प्रत्यभेः क्षिपः- प्रतिक्षिपति ।। प्राद् वहः- प्रवहति ।। परेर्मृषो वहश्च- परिमृष्यति, परिवहति ।। व्याङ्-परे

रमो नित्यम्, उपात् तु वा– विरमति, उपरमति, उपरमते ।। कर्मणि भावे चोक्तवदात्मनेपदमेव ।।२।।

|| इत्यात्मनेपद-परस्मैपदप्रक्रिया ।।३२।।

## ३३–अथ भाव-कर्मप्रक्रिया ॥

भावः क्रिया । भाव-कर्मविहिते शिति क्यः, भावे च युष्मदस्मत्सम्बन्धनिमित्तयोः कर्तृ-कर्मणोरभावादन्यार्थे एव, साध्यरूपत्वाच्च संख्यायोगो नास्तीत्यौत्सर्गिकमेकवचनमेव ।। त्वया मया अन्यैश्च भूयते, भूयेत, भूयताम्, अभूयत । स्वरान्त-ग्रह-दृश्-हन्भ्यः स्य-सिच्-आशीः-श्वस्तन्यां– 'ञिट्-इ' वा ॥ भावकर्मणो सर्वधातोरद्यतन्यास्ते 'ञिच्-इ' स्यात् तलुक् च ।। अभावि, अभाविषताम्, अभविषाताम्, बभूवे, भाविषीष्ट, भविषीष्ट, भाविता, भविता, भाविष्यते, भविष्यते ।। स्तूयते, स्ताविषीष्ट, स्तोषीष्ट । शम्यते । तनः क्ये आ वा ॥ तायते, तन्यते । दीयते, दायिषीष्ट, दासीष्ट । भञ्जेर्ञौ वा उपान्त्यस्य लुक् ।। अभाजि, अभञ्जि ।।

दुहि-पचि-दण्डि-रुधि-ब्रू-चि-मथि-मुषि-प्रच्छि-याचि-शास्वर्थाः ।
नी-ण्यन्त-वहि-कृषयस्तदर्थकाश्च द्विकर्माणः ॥१॥
कर्मणि प्रत्ययादुक्तिर्न्यादेर्मुख्ये दुहां परे ।
नीयतेऽजाऽमुना ग्रामं दुह्यतेऽनेन गौः पयः ॥२॥
विहाय प्रेरणांशं चेत् कर्म कर्ता स्वयं भवेत् ।
सकर्मकस्तदाऽकर्मा पच्यते स्वयमोदनः ॥३॥

॥ इति भाव-कर्मप्रक्रिया ॥ समाप्ता प्रक्रिया ॥३३॥

## ३४–अथ त्याद्यर्थ निरूपणम् ॥

सति-प्रारब्धेऽपूर्णेऽर्थे वर्तमाना ॥ अस्ति दिनम् ॥१॥

विधि-निमन्त्रणा-ऽऽमन्त्रणाऽधीष्ट-सम्प्रश्न-प्रार्थने सप्तमी पञ्चमी च स्याताम् ॥ विधिः क्रियायां प्रेरणा, प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायः– तद् निमन्त्रणम्, यत्र प्रेरणायामेव प्रत्याख्याने कामचारः– तद् आमन्त्रणम्, यत्र प्रेरणैव सत्कारपूर्विका-तद् अधीष्टम्, संप्रश्नः– संप्रधारणा, प्रार्थनं-याच्ञा ॥ मुनिः पठेत् ॥२॥

प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ। न्यक्कारपूर्विका प्रेरणा-प्रैषः, कामचारानुमतिः-अनुज्ञा, प्राप्तकालता-अवसरः ।। भवान् कटं करोतु, ग्रामं गच्छ, काले वर्षतु पर्जन्यः सुप्रभूतेन वारिणा ॥३॥

आ न्यायादुत्थानाद् आ न्यायात् संवेशनात्, उभयतः सार्धरात्रं वा– अद्यतनः, अनद्यतने भूते ह्यस्तनी ।। धर्ममकरोत् ।।४।।

भूते अद्यतनी ।। अगमद् ग्रामम् ।।५।।

भूतानद्यतने परोक्षे परोक्षा ।। धर्मं दिदेश जिनः ।।६।।

आशिषि आशीः पञ्चमी च ।। जीयान्नाभेयो भगवान्, जयताज्जिनशासनम् ।।७।।

वत्सर्यति भविष्यन्ती ।। भोक्ष्यति ।।८।।

अनद्यतने वत्स्यंति श्वस्तनी ।। कर्ता ।।९।।

सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः, सप्तम्या अर्थो निमित्तं हेतु-फलकथनादिका सामग्री, तत्र कुतश्चिद् वैगुण्यात् क्रियाया अतिपतनमनभिनिवृत्तिः क्रियातिपत्तिः, तस्यां सत्यां, एष्यति क्रियातिपत्तिः स्यात् ॥

यदि धर्ममकरिष्यत् सुखी अभविष्यत् ॥१०॥

स्मे पुरादौ चोपपदे भूतानद्यतने वर्तमाना ॥ आह स्म गुरुः, वसन्तीह पुरा छात्राः ॥११॥

हेतुफले वर्त्स्यति सप्तमी भविष्यन्ती च ॥ 'नाभेयं चेदुपासीत प्राप्नुयात् परमं पदम्' पक्षे– उपासिष्यते चेत् प्राप्स्यति ॥१२॥

स्मृत्यर्थे धातावुपपदे भूतेऽर्थे भविष्यन्ती, यच्छब्द-श्चेत् क्रियाविशेषणं न प्रयुज्यते ॥ स्मरसि मित्र ! शत्रुञ्जये यास्यावः ॥१३॥

माङि अद्यतनी, सस्मे ह्यस्तनी च ॥ मा कार्षीः पापम्, मा स्म करोः कार्षीर्वा ॥

॥ इति त्याद्यर्थनिरूपणम् ॥३४॥

## ३५-अथ कृदन्तप्रकरणम् ॥

धातोर्विधीयमानस्त्यादिवर्जो वक्ष्यमाणः प्रत्ययस्तु-मभिव्याप्य कृत् स्यात् ॥ घनघात्यः ॥१॥

निर्दिष्टादर्थादन्यत्रापि बहुलं कृत् स्यात् ॥ मोह-नीयं कर्म ॥२॥

अर्थविशेषोक्ति विना कृत् कर्तरि स्यात् ॥३॥

'णक-तृचौ– अक-तृ' धातोः ॥ श्रावकः, कर्ता, एधिता ॥ 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञा' इत्यतः 'कः-अ' स्यात् ॥ बुधः, प्रियः, किरः, गिरः, ज्ञः ॥ अच् धातोः ॥ करः, हरः ॥ नन्द्यादिभ्योऽनः ॥ नन्दनः ॥ ग्रहादिभ्यो 'णिन्– इन्' ॥ आतो ञ्णिति कृति ञौ च 'ऐः' स्यात् ॥ ग्रही, स्थायी ॥ घ्रा-ध्मा-पा-ट्धे-दृशः 'शः-अ' स्यात् ॥ जिघ्रः, धमः, पिबः, उद्धयः, उत्पश्यः ॥ 'ज्वलादि-दु-नी-भू-ग्रह-आस्रु' इत्यतो 'णः– अ' वा स्यात् ॥ ज्वलः, ज्वालः ॥४॥

कर्मणः पराद् धातोः 'अण्-अ' स्यात् ॥ कुम्भकारः ॥ 'कर्मणः परात्' इत्यग्रेऽपि ज्ञेयम् ॥ आतो डोऽह्वा-वा-मः, नाग ॥ गोदः, तन्तुवायः ॥ संख्यादेः कृगः 'टः– अ' स्यात् ॥ संख्याकरः, द्विकरः ॥ हेतु-तच्छीला-ऽनुकूले शब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदवर्जात् कर्मणः परात् कृगः 'टः-अ' ॥ यशस्करी विद्या, तीर्थंकरः, प्रेषणकरः, शब्दकारः ॥

हनोऽचिते कर्तरि 'टक्-अ' स्यात् ।। वातघ्नं तैल-म् ॥ ब्रह्मादिकर्मणः परात् हनः टक् । ब्रह्मघ्नः ।। अर्हः 'अच्– अ' स्यात् ।। पूजार्हा प्रतिमा ॥ दण्डा-दिवर्जादायुधादेः कर्मणः परात् धृगोऽच् ।। धनु-र्धरः, भूधरः, दण्डधारः ।। हृगो वयसि अनुद्यमे च गम्येऽच् ।। अस्थिहरः श्वशिशुः, मनोहरा माला ॥ देव-वातात् आप इः, शकृदादेः कृग इः ।। देवापिः, वातापिः, शकृत्करिः ॥ 'कुक्षि-आत्मन्-उदर' इति कर्मणः भृगः 'खिः-इ' ।। कुक्षिम्भरिः, आत्मम्भ-रिः ।। मन्यतेः 'णिन्-इन्' स्यात् ।। पण्डितमानी बन्धोः । प्रत्यार्थात् कर्तुः कर्मणः परात् मन्यतेः 'खश्-अ' स्यात् ।। स्वरान्तस्यानव्ययस्यारुषश्च खिदन्तोत्तरपदे मोऽन्तो यथासम्भवं ह्रस्वश्च ।। पण्डितम्मन्यः, कालिम्मन्या ।। एजेः खश् ।। अरि-मेजयः ॥ नाम्नो गमः 'खड्-ड-खाः–अ' स्यात्, बि-हायस्तु विहः ॥ तुरङ्गः, तुरगः, तुरङ्गमः, विहंगः, विहगः, विहंगमः ॥५॥

आधारात् शीङः अः, चरेस्तु 'टः-अ' स्यात् ॥ खशयः, कुरुचरी ॥ नाम्नः परात् भजो विण् ॥ अर्धभाक् ॥ नाम्नः परात् धातोर्यथालक्ष्यं-मन् वन् क्वनिप् विच् ॥ सुदामा । पञ्चमस्य वनि 'आङ्-आ' ॥ विजावा, सुधीवा, शुभंया, विच इत्त्वाल्लुक् ॥ नाम्नः परात् धातोर्यथालक्ष्यं क्विप् ॥ दिनकृत्, ह्रस्वस्य पित्कृति तोऽन्तः ॥६॥

'त्यदादि-अन्य-समान' इत्यत उपमानात् कर्मण परात् दृशः कमर्ण्येव टक् सक् क्विप् च– 'अ-स-०' स्युः ॥ दृग्-दृश-दक्षे अन्य-त्यदादेः आः स्यात्, ईदम्-किमो च 'ईत्-की'रूपो स्याताम् ॥ तादृशः, तादृक्षः, तादृक्, कीदृशः ३, ईदृशः ३, अमूदृशः ३ ॥ उपानात् कर्तु परात् धातोर्णिन् ॥ पिकभाषी ॥ अजातेर्नाम्नः परात् शीलार्थाद् धातोः 'णिन्-इन्' ॥ प्रस्थायी ॥७॥

करणान्नाम्नः परात् भूतार्थाद् यजेर्णिन् ॥ सोमयाजी ॥ ब्रह्म-भ्रूण-वृत्रात् कर्मणो भूतार्थात् हनः

क्विप् ॥ ब्रह्महा, वृत्रहा ॥ सु-पुण्य-पाप-कर्म-मन्त्र-पदात् कर्मणो भूतार्थाद् कृगः क्विप् ॥ सुकृत् ॥ कर्मणो भूतार्थाद् दृशः 'क्वनिप्-वन्' ॥ पारदृश्वा ॥ कर्मणः परादनुपूर्वात् सप्तम्यन्तपूर्वादजात्यर्थपञ्चम्यन्ताच्च भूतार्थाज्जनो 'डः—अ' ॥ पुमनुजः, स्त्र्यनुजः, आत्मानुजः, अब्जम्, यथालक्ष्यमन्यत्रापि-अनुजः, अजः ॥८॥

क्त-क्तवतू भूते ॥ खल्-अनट्-कृत्या अकर्तरि ॥ नतो मयाऽर्हन्, स्नातं च ॥ गत्यर्था-ऽकर्मक-पिब-भुजेः श्लिषादेश्च कर्तरि क्तो वा ॥ गतोऽसौ ग्रामम्, ग्रामोऽनेन वा, दो-सो-मा-स्थ इः क्ति तादौ ॥ स्थितः, पीतः पयः, पीतं पयोऽनेन वा, स भुक्त इदं, तेन भुक्तं वा, नारीमाश्लिष्टः, आश्लिष्टा वा नारी तेन ॥ सेट्क्तयोर्णेर्लुक् ॥ कारितः ॥९॥

उति उपान्त्ये शवर्हाद् अदादेश्च परौ भावारम्भयोः सेटौ क्त-क्तवतू वा किद्वत् ॥ कुचितं कोचितमनेन, प्रकुचितः, प्रकोचितः; प्रकुचितवान्,

प्रकोचितवान्; एवं– रुदितमित्यादि ॥१०॥

आरम्भे कर्तरि क्तो वा ॥ प्रभुक्त ओदनं चैत्रः, चैत्रेण वा प्रभुक्त ओदनः, प्रभुक्तं चैत्रेण ॥ डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः क्तौ सेटौ किद्वन्न ॥ शयितः ॥ आदितः क्तयोर्नेट् भिन्नः ॥११॥

'डीय-श्वि-ऐदित्' इत्यतः क्तयोरिट् न ॥ डीनः, त्रस्त ॥ ओदितः सूयत्यादेश्च क्तयोस्तो नः ॥ आदितो भावारम्भे सेटोः क्तयोरिट् वा ॥ मिन्नं मेदितम् ॥ णौ क्ते 'दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-ज्ञप्त' इति वा, पक्षे दमित इत्यादि ॥ अमूर्छमदो र-दात् क्तयोः क्तस्य नः, धातुदश्च नः ॥ पृवर्जाद् ऋदन्तात् ल्वादेश्च 'क्ति-क्त-क्तवतु' क्तस्य नः । कीर्णः, लूनः, भूतः । एकस्वराद् 'उवर्णान्त-ऋवर्णान्त-श्रि-ऊर्णु' इत्यतः कित इट् न ॥ प्राद् दाग आरम्भे क्ते त्तो वा ॥ प्रत्तः, प्रदत्तः ॥ दासंज्ञस्य ते किति दत्, धागस्तु हिः ॥ दत्तः, दत्तवान्, निहितः ॥ ऋ-ह्री-घ्रा-घ्रा-त्रा-उन्द-नुद-विन्तेः क्तयोस्तो न् वा स्यात् ॥ त्रातः,

आणः ॥ भावे क्लीबे क्तः ॥ हसितं त्वया ॥ क्षैशुष्-पचः क्तयोस्तस्य म-क-वं स्यात् क्रमेण ॥ क्षामः, शुष्कः, पक्वः ॥१२॥

परोक्षामात्रविषये क्वसु-कानौ, तौ च परोक्षावत् ॥ 'घस्-एकस्वर-आदन्त' इत्यतः क्वसोरादिरिट्, गम्-हन्-विद्लृ-विश्-दृशस्तु वा ॥ पेचिवान् जग्मिवान् जगन्वान्। 'ईयिवान्, अनाश्वान्, अनूचानः' इति भूते कर्तरि वा, पक्षे- अगात्, इत्यादि ॥ वेत्तेः सदर्थे वा क्वसुः ॥ विद्वान् विदन् ॥ सति 'शत्रानशो-अत् आन', एष्यति तु स्ययुक्तौ ॥ यान्, यास्यन् । अतो म आने ॥ पचमानः ॥ आसीन इति निपात्यते ॥१३॥

सति शील-धर्म-साधुषु धातोः 'तृन्-तृ' भ्राज्यलं-कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप इष्णुः, भू-जेः 'ष्णुक्-ष्णुः' स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः, त्रसि-गृधि-धृषि-क्षिपः क्नुः सन्-भिक्ष्-आशंसेः-उः, 'विन्दु-इच्छु' इति निपातनम्, शॄ-वन्देः-आरुः, दा-ट्धे-सि-शद्-सदो रुः, शीङ्-श्रद्धा-

निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेः-आलुः,'सस्त्रि-चक्रि-दधि-जज्ञि-नेमि' इति ङ्यन्तनिपातनम्, शॄ-कम-गम-हन-भू-स्थः, लष-पत-पदश्च- उकण्, भूषार्थादेः-अनः, जागुः-ऊकण्, शमष्टकात्-'घिनण्-इन्' स्युः ।।१४।।

नन्ता जिनम्, भ्राजिष्णुः, भूष्णुः, स्थास्नुः, त्रस्नुः, लिप्सुः, विशरारुः, दारुः, शयालुः, अभिलाषुकः, भूषणः, जागरूकः, शमी; एवम्-सृ-घस्-अदो-'मरक्-मर' 'भञ्जि-भासि-मिदो 'घुरः-उर', वेत्ति-च्छिद-मिदो 'घुरक्-घुर', स्म्यादेः-रः । सृमरः, भङ्गुरः, विदुरः, स्मेरम् ।।१५।। इति कृदन्तप्रकरणम् ।।३५।।

## ३६—अथोणादिः

ओँ नेमिसूरिराजाय, गुरवे शीलसद्मने ।
सर्वतन्त्रस्वतन्त्राय, तस्मै नित्यं नमो नमः ।।१।।

"अव रक्षणादौ" अवतीति-ओम्, मप्रत्यय ऊट् च । नयतेर्मिप्रत्यये-नेमिः, धर्मचक्रस्य नेमिवत् नेमिः । सुदति संशयमिति-सूरिः, रिक् प्रत्ययः । राजत इति-राजा, अन् । गृणाति सद्धर्ममिति-गुरुः, कित् उप्रत्ययः । शेते सुखमनेनेतिः-शीलम्, लो

दीर्घश्च। सीदन्त्यस्मिन्-सद्म, मन् । सरतीति सर्व-
म्, वः । तनोतीति– तन्त्रम्, त्रः । अस्यतीति-स्वः,
वान्तनिपातनम् । तनोतीति-तत्, डत् । नमनं-नमः,
अत्रास् प्रत्ययः ।। इत्युणादायोऽपरिमिताः ॥३६॥

## ३७–अथ भावे तुमो निरूपणम् ॥

क्रियार्थायां क्रियायां तुम् णकच् भविष्यन्ती च ।।
जिनं नन्तुं याति ।। शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-
ग्ला-घटा-ऽस्ति-समर्थार्थे इच्छार्थे चोपपदे तुम् ।।
शक्नोति भोक्तुम्, समर्थो भोक्तुम्, इच्छति भोक्तुम्
॥३७॥

## ३८–भावे कर्तृभिन्नकारके च कृन्नि-रूपणम् ॥

भावाकर्त्रोः-'घञ्-अ' ।। पाकः, दायः । इवर्णोवर्ण-
वृ-दृ-दश्-रण्-गम्-ॠद्-ग्रहः 'अल्-अ' ।। चयः, रवः ।।
'भू-श्रि-अद्' अतः सोपसर्गाद् अल् ।। प्रभवः ।। अनु-
पसर्गाद् व्यध-जप-मदः 'अल्' ।। व्यधः, जपः, मदः ।।

विच्छो 'नङ्-न' ।। विश्नः ।। यजि-स्वपि-रक्षि-यति-प्रच्छो नः ।। यज्ञः, प्रश्नः ।। उपसर्गाद् दः 'किः-इ' ।। विधिः, दधिः, उदधिः ।। स्त्रियां 'क्तिः-ति' ।। कृतिः ।। स्त्रियां शंसि-प्रत्ययात् क्रेटो गुरुमतो व्यञ्जनान्ताच्च-अः ।। प्रशंसा, चिकीर्षा, ईहा ।। स्त्रियां षितः 'अङ्-अ' ।। पचा । भिदाप्रमुखा निपात्यन्ते ।। स्त्रियां णि-वेत्त्यास-श्रन्थ-घट-वन्देः-अनः ।। कारणा ।।१।।

क्लीबे भावे 'अनट्-अन' ।। गमनम् । करणाधारयोरनट्, पुंनाम्नि तु 'घः-अ' ।। पचनोऽग्निः, पचनी स्थाली, आकरः ।। तत्र व्यञ्जनान्ताद् 'घञ् अ' ।। वेदः ।। उदः स्था-स्तम्भोः सो लुक् ।। उत्थानम् ।। 'इ कि श्तिव्' इति धातोः स्वरूपेऽर्थे च ।। भञ्जिः, क्रुधिः, वेत्तिः ।।२।।

कृच्छ्रार्थात् दुरः, अकृच्छ्रार्थात् 'सु-ईषत्' इत्यतश्च परात् धातोः 'खल्-अ' शासू-युधि दृशि-धृषि-मृषाऽतश्च अनः स्यात् ।। दुष्करः, सुकरः, ईषत्करः, दुःशासनः, सुशासनः, ईषच्छासनः ।।३।। ।।३८।।

## ३९–अथ कृत्यनिरूपणम् ॥

ऋवर्णान्ताद् व्यञ्जनान्ताच्च 'ध्यण्– य' ॥ क्तेऽनिटश्चजोः क-गौ धिति, वचोऽशब्दनाम्नि तु न ॥ कार्यम्, वाच्यम्, वाक्यम् ॥ उवर्णान्तादावश्यकेऽर्थे ध्यण् ॥ भव्यम् ॥ तव्या-ऽनीयौ ॥ कर्तव्यम्, करणीयम् ॥ स्वरान्ताद् यः, आतश्च एः ॥ चेयम्, देयम् ॥ शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् यः ॥ शक्यम्, गम्यम् ॥ कृपि-चृति-ऋचिवर्जात् ऋदुपान्त्यात् 'क्यप्-य' ॥ नृत्यम् ॥

॥ इति कृत्यनिरूपणम् ॥ ३९ ॥

## ४०–अथ क्त्वानिरूपणम् ॥

परकालेन धात्वर्थेन तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः सम्बन्धे 'क्त्वा-त्वा' वा स्यात् । जिनं नत्वा स्तौति । अनञः क्त्वो 'यप्-य' स्यात् ॥ प्रणम्य ॥ निषेधे 'अलं-खलु' इत्युपदयोः क्त्वा वा ॥ अलं कृत्वा ॥ क्त्वा सेट् किद्वत् न ॥ देवित्वा ॥ ऊदितः क्त्वा वा सेट् ॥ दान्त्वा, दमित्वा ॥ यमादीनां मस्य

यपि वा लुक् ॥ प्रणम्य प्रणत्य ॥ लघोः परस्य णेर्यपि 'अय्' स्यात् ॥ परिणमय्य भुङ्क्ते ॥ आभीक्ष्ण्ये प्राक्काले तु 'ख्णम्—अम्' क्त्वा च स्यात् ॥ स्मारं स्मारं युगादीशं लप्स्ये श्रीपरमं पदम् ॥

॥ इति क्त्वानिरूपणम् ॥ ४० ॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्—सूरिचक्र-
चक्रवर्ति—सर्वतन्त्रस्वतन्त्र-जगद्गुरु—श्रीविजय-
नेमिसूरीश्वर-पट्टालंकारेण 'शास्त्रविशारद-
व्याकरणवाचस्पति—कविरत्न' इति पदा-
लंकृतेन श्रीविजयलावण्यसूरिणा
विरचितायां श्रीहेमचन्द्रि-
कायामुत्तरार्धं-
समाप्तम् ॥

समाप्ता श्रीहेमचन्द्रिका ॥

॥ भद्रं भूयाद् श्रीश्रमणसंघस्य ॥

## ॥ अथ प्रशस्तिः ॥

●

शिवगञ्जे पुरे रम्ये, नन्देन्दुव्योमलोचने ।
विक्रमाब्देऽसिते भाद्रे पञ्चम्यां जन्मवासरे ॥१॥
लावण्यसूरिणा दृब्धा लघ्वीयं हेमचन्द्रिका ।
बालमोदं वितन्वाना नन्दताज्जगतीतले ॥२॥
संक्षिप्तापि सुधीगम्या मेघजा शब्दचन्द्रिका ।
अथेमां सरलां लब्ध्वा लभन्तां शिशवो मुदम् ॥३॥

卐

मुद्रकः—
श्री मख्तूरमल कुम्भट
कुम्भट प्रिण्टर्स, घोड़ों का चौक, जोधपुर
बाईन्डिगः—
कुम्भट बाईन्डिग वर्क्स, होस्पीटल रोड, जोधपुर